* श्रीसरस्वती शरणम् *

एकादशे वर्षे] भाद्रस्य पूर्णिमा सं० १९९२, [तृतीय-संख्या



रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन् ।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्
संजातः सुमनोमनो मधुरयन् सर्वत्र "सूर्योदयः" ॥

सम्पादकः—

श्रीमान् अन्नदाचरणशर्मा तर्कचूडामणिः

[महामहाध्यापकः, महामहोपाध्यायः]

—:*:—

उद्गम-स्थानम्—

श्रीभारतधर्ममहामण्डलम्, (जगत्गंज) काशी ।

—:०:—

वार्षिकं मूल्यं मुद्रात्रयम् ।

संरक्षकेभ्यः ५) असमर्थेभ्यः छात्रेभ्यः १)
वैदेशिकेभ्यः ६) पुस्तकालयेभ्यश्च १)

विषयसूची ।

* ॐ तत्सत् *

निवेदन-पत्र ।

१—इस विश्वविद्यालय की परीक्षा नियमावली गत अंक में प्रकाशित हुई है । खास तौरपर 'सूर्य्योदय' में इस लिये दी गयी है कि, सबके पास पहुँच जाय और सब सज्जन इस स्वजातीय धार्म्मिकाध्यात्मिकोन्नति और विद्याप्रचारकी उन्नतकी ओर ध्यान दे सकें ।

२—विश्वविद्यालयके परीक्षाकेन्द्रोंमेंसे जिन्होंने अभी परीक्षाका कार्य आरम्भ नहीं किया है, उनको अब शीघ्र आरम्भ कर देना चाहिये । सूर्य्योदय भविष्यत्में नियमितरूपसे उन्हीं केन्द्रोंमें पहुँचेगा, जिनमें परीक्षा हुआ करती है ।

३—जिन केन्द्रोंमें परीक्षा होती है उनके केन्द्र-मानपत्र यदि न पहुँचे हों, तो उनके पत्र लिखनेपर केन्द्र-मानपत्र भेज दिये जायगें ।

४—परीक्षोपयोगी पुस्तकोंके लिये इसी कार्यालयमें पत्र आनेसे भिजवानेका प्रबन्ध किया जा सकेगा ।

५—इस वर्ष संस्कृतविश्वविद्यालय और तदन्तर्गत आयुर्वेद-सम्मिलनी की सभी परीक्षाएं १५-४-३६ ई० से प्रारम्भ होकर १६-४-३६ ई० तक समाप्त होंगी । आवेदन पत्र मंगाने का समय ३०-१२-३५ ई० तक है ।

कार्याध्यक्ष—

अ० भा० व० धार्मिकाध्यात्मिकसंस्कृतविश्वविद्यालय,

महामण्डलभवन,

जगत्गंज, बनारस ।

सम्प्रति ते तु निःश्रेयसपदं प्रस्थिताःसन्ति । परन्तु तदीया भक्तास्तत्परिचिताश्च विद्वांसो धनिनश्च ये सन्ति तेषां हि कर्तव्यमिदमिदानीं वर्तते, यत्तदीयमारब्धं संस्कृतविद्यालयादिधार्मिकं कृत्यं सुदृढं सत् समुन्नतं स्यादिति सर्वथा ते यतन्तामिति निवेदनं विधाय तद्वियोगसन्तप्तमनस्कतया विरम्यते ।

विषयसूची।

१—
२—
३—
४—
५—
६—
७—

११—
१२—
१३—
१४
१५
१६
१७
१८

१९
२०
२१

निवेदन।

सविनय निवेदन है कि, भारतधर्ममहामण्डल और उसकी संयुक्त-संस्थाओंकी छपाई और पुस्तक-विक्रीका सब काम 'भारतधर्म सिण्डिकेट लिमिटेड' नामक कम्पनीको दिया जाता है। वह कम्पनी शत्रुओं द्वारा मुकद्दमेके अड़चनमें पड़ गयी है। अदालतकी आज्ञासे उसका कारोबार बन्द है। हमारे मासिकपत्रों, पुस्तकों आदिका मसाला उसके कार्यालयमें बन्द है। अदालतका फैसला होते ही सब काम फिर शुरू हो सकेगा। अतः निवेदन है कि, इससे सम्बन्ध रखनेवाले सज्जनों को जो कष्ट हो रहा है, उसके लिये क्षमा करें। और अब जिनको पुस्तकोंकी जरूरत होवें निम्नलिखित पते से पत्र भेजें।

आफिसर-इन-चार्ज,
श्रीभारतधर्म महामण्डल,
जगतगंज, बनारस कैण्ट।

सूर्योदयः।

एकादशे वर्षे } भाद्रस्य पूर्णिमा सं० १९९२ { तृतीय-संख्या

सम्पादकीया अभिप्रायाः।

स्वामि-पूर्णानन्दमहोदयाः ।

एतेषामिह विश्वनाथपुर्यां भाद्रे मासि अलईपुरस्थ-निजमठे आकस्मिकः शरीरपातः समजनीति श्रुत्वेदमनभ्रवज्रपातं केषां हि सनातनधर्मणां तज्ज्ञान संस्कृतज्ञानां विदुषां च हृदयं शोकसन्तप्तं न स्यात् । ते सन्यासिन आसन् त्यक्तैषणात्रया इति तेषां कृते शोकसन्तापस्तु नैव कर्तव्यः, नापि च ते शोच्याः सन्ति । यतो हि विरक्तमनसां काश्यां त्यक्तदेहानां परोपकारैकव्रतानान्तेषां नैःश्रेयसपदप्राप्तौ कियान् प्रयासः । शोच्यास्तु इदानीं ते संस्कृतज्ञा विद्वांसोऽन्तेवासिनश्च सन्ति, येषां कृते तेषां जीवनमासीत् । ते हि आजमगढ़मण्डलान्तर्गत-मउनाथभञ्जनप्रभृतिप्रदेशेषु बलियामण्डले गोरक्षपुरे च बहुत्र भ्रमणं कुर्वन्तः सनातनधर्मोपदेशञ्च ददतः संस्कृतविद्यालयानां प्रतिष्ठापनं कृतवन्तःसन्ति । तेषामिदमेव ध्येयमासीद्व यद्व यथायथा संस्कृतभाषाप्रचारो भविष्यति, तथा तथा देशे धर्मस्य सद्भावस्य भारतीयसंस्कृतेश्च सुरक्षा भविष्यतीति । अनेनैव दृढ़संकल्पेन संस्कृतविद्यालयान् प्रतिष्ठाप्य तेऽस्मिन् प्रदेशे साधु संस्कृतभाषाध्ययन-व्यवस्थां दृढ़ीकृतवन्तः सन्ति । ते हि निर्भीका वक्तार आसन् । सनातनधर्मव्याख्यानावसरे कुमार्गगामिनोऽत्यर्थं भर्त्सयन्ति स्म । किं बहुना "निर्मानमोहा जितसंगदोषाः" इति गीता-पद्यस्य जागरूकोदाहरणीभूतास्ते आसन् ।

सम्प्रति ते तु निःश्रेयसपदं प्रस्थिताःसन्ति । परन्तु तदीया भक्तास्तत्परिचिताश्च विद्वांसो धनिनश्च ये सन्ति तेषां हि कर्तव्यमिदमिदानीं वर्तते, यत्तदीयमारब्धं संस्कृतविद्यालयादिधार्मिकं कृत्यं सुदृढं सत् समुन्नतं स्यादिति सर्वथा ते यतन्तामिति निवेदनं विधाय तद्वियोगसन्तप्तमनस्कतया विरम्यते ।

धार्मिकपरीक्षा ।

श्रीमन्तः पाठकमहानुभावाः !

अ० भा०संस्कृत विश्वविद्यालयस्य परीक्षानियमावली मुद्रिता सती सर्वत्र सूर्य्योदयेन सहैव प्रेषिता । श्रीमतां पार्श्वेऽपि सोपस्थितैव स्यात् । सम्प्रति सर्वेषामेव भारतीयां प्राक्तनीं संस्कृतिं संरक्षितुं तत्पराणां विज्ञानामिदं परमं कर्तव्यम् विद्यते । यत् सर्वत्र भारते 'धार्मिक्याः शिक्षायाः प्रचारः सर्वथा समेधितः स्यादिति । पश्यन्तु, उपेक्षितधर्मभावा अनीश्वरवादप्रधाना चार्वाकसिद्धान्तसम्भृता साम्प्रतिकी शिक्षा पाश्चात्यवात्यानुन्ना विज्ञानाभासरेणुभि र्भारतीयानन्धान् कुर्वती प्रतिगेहं प्रविष्टा विद्यते । यया हि नहि केवलमिंग्लि श्कूलाशालाध्यायिन एवान्तेवासिनः, प्रत्युत संस्कृतच्छात्रा अपि भारतीयां संस्कृतिं स्वीयर्षिमहर्षिं प्रणीत-धर्म-मर्य्यादाञ्चोपेक्ष्य सर्वथा पाश्चात्यसभ्यताश्रद्धाजुषो जायन्ते । तेषां निरोधो न केवलं शास्त्रवचसां प्रामाण्योपन्यासेनैव सम्भवति । किन्तु शास्त्रवचोभिः सह सन्तीदानीं सविज्ञानयुक्तीनामप्युपन्यासस्य प्रयोजनानि । येन च श्रवणमननोपेताः सर्वेऽपि भारतीयाः स्वधर्मज्ञानं दृढं सविज्ञानं सप्रमाणं सयुक्तिकञ्च सम्पादयन्तः स्वयं धैर्य्यजुषः स्वधर्मे श्रद्धां विभ्रीरन् । अन्यांश्च तत्प्रतिपक्षिणो मार्गे संस्थापयितुं समर्थाः सम्पद्येरन् । स्ववर्गीयानपि तत्र दृढश्रद्धाभाजो विदध्यीरन् इति महर्षीणामपि सतर्कस्यैव धर्मज्ञानस्य सम्पादने निर्देशो दृश्यते । तथा हि—

"आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ।
प्रत्यक्षञ्चानुमानञ्च शास्त्रञ्च विविधागमम् त्रयं सुविदितं कार्य्यं धर्मशुद्धिमभीप्सता"

इत्यादि वाक्यकदम्बैः प्रतीयते यद्धर्मज्ञान-दार्ढ्याय प्रत्यक्षानुमानशास्त्राणि समुदितान्येव दण्डचक्रचीवरन्यायेन कारणतां व्रजन्ति । नतु तृणारणिमणिन्यायेन व्यस्तानीति बहुसम्मतः पन्थाः । ततश्च शास्त्रज्ञानेन सहानुमानप्रतिनिधिभूतसविज्ञान युक्तीनां प्रत्यक्षस्थानीयानामितिहासकथाप्रभृतिदृष्टान्तानाञ्च ज्ञानमावश्यकमपेक्ष्यते धर्मज्ञाने इति सर्वैरेव सहृदयैः स्वीकरणीयम् । सत्यप्येवं व्यतिकरे सम्प्रति सर्वोपयोगिन्या धर्मशिक्षाया एव सर्वत्रैव संस्कृतेंग्लिश्कूलशाला-कुमारशाला-कन्याशालाप्रभृतिषु अभावो विद्यते । सर्वाङ्गसम्भृतायास्तु कथैव का ? इति विमृश्यैव भारतीय-सर्वधर्म-सभाप्रतिनिधिभूतायाः श्रीभारतधर्ममहामण्डलाख्याया धर्मसंस्थायाः संचालकैरयं धार्मिको विश्वविद्यालयः प्रतिष्ठापितः । यतश्चेयं धार्मिकी परीक्षा प्रतिवर्षं महतायोजनेन सर्वत्रैव भारतवर्षे भवति ।

इह परीक्षायां सर्वस्मिन्नेव विषये धर्मग्रन्थानां सन्निवेशो विद्यते । येन चानायासेनैव सर्वेऽपि वैयाकरणा दार्शनिका ज्योतिर्विदश्चिकित्सका अन्येऽपि

हिन्दीभाषाभिज्ञाः परीक्षार्थिनो धर्ममर्मज्ञा भवेयुरिति । धर्मग्रन्थाश्चैवंभूता 'धर्मविज्ञान' प्रभृतयः पाठ्यपद्धतौ सन्निवेशिताः सन्ति । येषामध्ययनेन पूर्वोक्ताः सर्वा अपि सामग्र्यः प्रत्यक्षानुमानशास्त्रस्वरूपाः । दृष्टान्त-युक्तिनिचयाप्तवाक्यानीति यावत् एकत्रैव सम्भृता उपलभ्यन्ते । येषां ग्रन्थानामध्ययनेन मन्दप्रज्ञोऽपि धर्ममर्म्मज्ञो भूत्वा सदसि वाक्पाटवेन सहैव उपर्युक्त-सर्वकर्तव्यपरायणो भवितु मर्हति ।

किं बहुना अ० भा० संस्कृतविश्वविद्यालयीयेयं परीक्षा सम्प्रति सर्वैरेव भारतीयैः समुत्तरणीया स्वीयाश्चोत्तरीतुं प्रेरणीयाः । यतश्च स्यात्पुनर्भारतीय-संस्कृति-संरक्षणसमादरः । सर्वे साम्प्रतिकाः पाश्चात्यविज्ञान-वात्या-धूलि-कषायित-नयना मार्गे संस्थापिताश्च स्युः । सर्वथा सम्वर्द्धमानश्च धर्ममर्य्यादोपेक्षाभावोऽपसृतः स्यादिति । ताश्च सर्वा अपि परीक्षा अस्मिन् अप्रैल मासि १५ पंचदश तारीकातो भाविन्य स्तदर्थ मावेदन-पत्राणि च दिसम्बरमासावधि-कार्य्यालयतो ग्राह्याणीति सम्प्रत्येव सूचयामः । अग्रे च सूर्योदयस्य प्रकाशने दीर्घ-विलम्बसम्भावना प्रतीयते । यतो वै विशेषाङ्को हि वृहदाकारो भविष्यतीत्यत्र नास्ति सन्देहलेशः । अतश्च 'सूर्योदय' ग्राहकैस्तदङ्कस्य कृते त्वरया कार्यालये पत्रप्रेषणे कष्टोऽपि नाश्रयणीय इत्यपि पूर्वमेव निवेदयामः ।

श्राद्धविज्ञानम् ।

श्रीमन्तः पाठकमहानुभावाः ! १९९२ वैक्रमाब्दे आश्विनमासस्य प्रथम-सौरतिथौ मंगल वासरीये 'आज' पत्रे पं० श्री आशेश्वरझामहोदयस्य श्राद्ध-विषये 'पितृपक्षे श्राद्धं कथं कर्तव्यं भवतीति' शीर्षकात्मको लेखो मुद्रितोऽस्ति । तत्रत्यो हि विषयो गम्भीरो विद्यते तस्य विस्तृतं विवरणन्तु कदाचिदिह सूर्य्योदये समयान्तरे प्रकाशयिष्यामः । सम्प्रति तान् आर्य्यसमाज प्रवर्तकस्वामिदयानन्द-महोदयानुगान् वयं हितबुद्ध्योपदिशामो यत्ते यदि स्वामिदयानन्दमहोदस्य सत्यं पन्थानमनुकुर्वन्ति चेत्तदा तत्पत्रं पठित्वा तस्य खण्डनं कुर्वन्तु । अथवा सत्यं कुतोऽप्याश्रयणीयमिति स्वीयनियमत एवाद्यारभ्य आर्य्यसमाजे पुनः श्राद्धप्रतिष्ठां समारभन्ताम् । एवमुपेक्षयोपयोगिनः कर्तव्यस्य त्यागस्तु न वरम् । तच्च कर्तव्य-मपि एतादृग् विद्यते येन भारतस्य महद्ग गौरवं समेधते ।

इह तदीयं वक्तव्यमहं किञ्चित् संक्षिपामि । यद्यपि तत्राशास्त्रीयमपि बहु विद्यते भारते यो हि वैदिको धर्मः प्रचलितोऽस्ति, स हि विज्ञानमूलको विद्यते। तत्र श्राद्ध-

विज्ञानं निरूपयन् स ब्रूते यदि श्राद्धस्य सर्वथा त्यागो भवेत् तर्हि सृष्टिचक्रमेव विलुप्तं स्यात् । अतो वै भारतीयाः प्राचीना महर्षयो विज्ञानस्यान्तस्तले प्रविष्टा आसन् ते हि सृष्टिचक्रस्य सर्वमपि विज्ञानं साधु विदन्तिस्म । वेदे हि श्राद्धतत्त्वस्य विधानं अद्भुतविज्ञानसम्भृतं विद्यते । तथाहि चन्द्रलोकतोऽष्टाविंशतिभागो रेतसः पुरुष शरीरे प्रविश्य तिष्ठति । येन च पुरुषो भार्य्यया सह सम्पृक्तः सन्तानं जनयति । मरणकाले स महानात्मा चन्द्रलोके एव गच्छति । चन्द्रलोके यो हि अम्भः प्राणो विद्यते । स एव अष्टाविंशतिमंशान् रेतसि प्रयच्छति । ते एव अंशाः पितृणशब्दे नोच्यन्ते । त एवांशाः पुनः श्रद्धामार्गेण चन्द्रलोके प्रेष्यन्ते । एतद्धि श्राद्धवाच्यं विद्यते । श्रद्धामार्गस्य सम्बन्धो हि मध्याह्नकाले एव पृथिव्या सह भवतीति मध्यान्हे श्राद्धानुष्ठानविधिः शास्त्रे विहितोऽस्ति । मध्याह्नकाले सूर्य्यस्य सुषुम्नानाड्याः साहाय्येन एव कश्चिद्रश्मिश्चन्द्रलोकतः पृथिव्यामायाति येन सह पितृ-प्राणा अपि व्याप्तास्तिष्ठन्ति । स एव रश्मिरितः श्रद्धया मृतप्राणिने समर्पितं यवतण्डुलपिण्डं सलिलं तत्र समर्पयति । पिण्डे यवतण्डुल-तिलादीनामेवोपयोगो यद्भवति तत्रापि विज्ञानमिदं विद्यते । सोमस्य यवेन सह घनिष्ठः सम्बन्धः । सोमस्य च सूक्ष्मा नदी उत्तरतो दक्षिणस्यां दिशि प्रवहति याश्च क्षेत्रगत-धान्यं विशेषतो गृह्णाति । अतस्तत्र सोमभाग आधिक्येन विराजते । अत एव धान्यस्यैव पिण्डे प्राधान्यमित्थं हि यवेऽपि सोमप्राधान्यं ज्ञेयम् ।

आश्विनकृष्ण प्रतिपत्तोऽमावास्यां यावत् श्राद्धकालस्यापि तत्र विशेषेणैव विज्ञानं विवृतं विद्यते । झामहोदयो ब्रवीति—यद् यो हि रश्मिरन्यदा मध्यान्ह काले उपरिभागे गच्छन् भवति । स हि आश्विनकृष्णप्रतिपत्तोऽमावास्यां यावत् पृथिव्यामेव व्यापृतस्तिष्ठति । तेनैव सह व्याप्तःपितृप्राणोऽपि पृथिव्यामेव व्याप्तो भवति । अस्मिन् काले यस्य अष्टाविंशतिभागस्य रेतसः कृते स पितृप्राणः चन्द्रलोके अम्भःप्राणेन सहाबद्धो विद्यते । तमेव पूरयितुं स प्राणः स्व-स्व-परिवार-वर्गे पर्यटति । तदानीं ये हि कुटुम्बिनस्तर्पणश्राद्धादि कृत्यं कुर्वन्ति तेनाप्यायितः स प्रसीदति । ये च पुत्राः स्वपित्रे स्वमृतपरिवाराय पिण्डादिकं वितरन्ति ततो रेतसो भागं गृहीत्वा चन्द्रलोकस्थितायाम्भःप्राणाय दत्वा स्वीयं ऋणशोधनं करोतीत्यादि बहु विस्तरेण तत्र झामहोदयेन विवृतं विद्यते । येषामुत्कण्ठा स्याच्चे तत् 'आज' पत्रं गृहीत्वा पठन्तु ।

—:o:—

स्वर्गस्थाः कविराजधर्मदासमहोदयाः।

इह काश्यां निजभवने चरकाचार्य्याणां कविराज-धर्मदासमहोदयानां भाद्र-शुक्लनवम्यां (१९९२ वै०) नेत्राङ्कनवाब्जमिते वैक्रमे चतुःसप्ततिवर्षावस्थायां कैलाशवासोऽभूत्।

एतेषां कविराजमहोदयानां जन्म १९१८ विक्रमीयाष्टचन्द्रनवभूमिते सम्वत्सरे आसीत्। आयुर्वेदशिरोमणीनां गंगाधरसेनाचार्य्याणामिमे प्रधान-शिष्या आसन्। आयुर्वेदे इमे सिद्धहस्ताः पीयूषपाणयोऽद्वितीया विद्वांसोऽभू-वन्। एतेषां चरकसंहिताज्ञानन्तु असाधारणमासीत्। कापि चरकटीका तैर्निर्मि-ताऽस्तीति श्रूयते। हिन्दूविश्वविद्यालयीयायुर्वेदविभागस्येमे प्रधानाध्यापका आसन्। एतेषां चिकित्साप्रणाली अद्भुतप्रभावशालिनी चासीत्। असाध्यानपि रोगिण इमे निजचिकित्सापद्धत्याऽनायासेनैव नीरुजः कुर्वन्ति स्म। किं बहुना एतेषामाकस्मिक-वियोगेन सम्प्रति 'आयुर्वेदविज्ञानराशिर्विलुप्तः' इत्येव वक्तुम्पार्य्यते।

एतेषां प्रधानशिष्याः श्रीमन्तः पण्डितसत्यनारायणशास्त्रिप्रभृतयः प्रख्याता महान्त आयुर्वेदविद्वांसः सन्ति। यैरवश्यमेषां चिकित्सा-पद्धतिरिह काश्यां सर्वथा समुज्जीविता विद्यते। तेषामात्मजाः श्रीमन्तो भूपेन्द्रनाथकविराजगणपति-महोदया अपि सम्यक् चिकित्साकर्मणि प्रख्याताः सन्ति। तेषां चिकित्साऽपि अमोघैव भवतीति बहुशः प्रसिद्धिः श्रूयते।

अस्तु, कविराजधर्मदासमहोदयानां कैलासवासेनायुर्वेदज्ञानां महती हानिः संजाता। काशीपण्डितमण्डली तु तच्छोकनिमग्ना भृशं तद्वियोगसन्ता-पमनुभवति। श्रीकाशीविश्वेश्वरात्तेषामात्मनः चिरशान्तिं तत्परिवारस्याभ्युदय-ञ्चाभ्यर्थयामहे।

स्मृत्यङ्कः।

श्रीमन्तः सूर्योदयपाठकाः! गताङ्केऽस्माभिर्निवेदितमासीद् यदग्रिमोऽङ्कः श्रीस्वामि दयानन्दमहाराजस्य स्मृत्यङ्को भविष्यतीति। परन्तु अद्यावधि विदुषां महोदयानां तत्सम्बन्धे स्मृति-लेखा नैवोपस्थिता नापि च तत्सम्बन्धीयावश्य-कान्या एव सामग्र्योऽधुनापि सम्भृता जाता इति स्मृत्यङ्के सम्प्रति विलम्बं विलोक्य पाठकानां लेखकानाञ्च सम्मानरक्षाबुद्ध्या भाद्रमासस्याङ्कः प्रका-श्यते। अग्रे सम्भृतास्वखिलास्वपि स्मृत्यङ्क-विशेषसामग्रीषु सोऽङ्कः विपुलाकारः

शीघ्रमेव प्रकाशितो भविष्यति । तदर्थं सततं प्रयत्नो विधीयते यच्छीघ्रमेव सर्वापि स्मृत्यङ्गसामग्री सुसम्पन्ना स्यादिति ।

देवभाषापरिषदः प्रस्तावाः ।

अस्माकं पार्श्वे विलम्बेनोपस्थितं देवभाषा परिषदो विवरणम् इति ततः कियत आवश्यकान् प्रस्तावानेव 'सूर्योदय' पाठकानां पुरतः संस्थापयामः ।

एतद्वर्षीयं श्रीदेवभाषापरिषदोऽधिवेशनं छपरामण्डलान्तर्गतसिवान-नगरेऽभूत् । तत्र काशीस्था मोदफलपुरीयाः छपरामण्डलीयाश्च बहवो विद्वांसः समुपस्थिता आसन् । वार्षिक विवरणपाठादि-कृत्यानन्तरं अधस्तनाः प्रस्तावाः सर्वसम्मत्या तत्र स्वीकृता अभूवन् । तेषां स्वरूपमविकलमेवेहोद्ध्रियते । तथाहि—

१—प्रस्तावः—देवभाषा एव राष्ट्रभाषा भवेदिति प्रस्ताव विषये 'पं० श्रीरामनारायणदत्तपाण्डेयः शास्त्री, पं० श्रीकपिलदेवपाठकः काव्यतीर्थः, श्री आर० एस० नारायण स्वामी, पं० श्रीरामरत्नोपाध्यायः सांख्यरत्नम्, श्रीकमलेश-चक्रवर्त्ती बी० ए० काव्यरत्नम्' इत्यादयो महानुभावा ओजस्विभाषणम् अददुः ।

२—प्र तावः-हिन्दूसभ्यता, हिन्दूसंस्कृतिः, हिन्दूधर्मश्च राष्ट्रभाषया संस्कृत-भाषया सहाविच्छेद्यभावेन संलग्ना अत आर्यजातेः कृते संस्कृतभाषाध्ययनं निजास्तित्वरक्षणाय परमावश्यकम् । अतः परिषदियं प्रस्तौति यद्भारतीयविद्या-लयेषु प्रत्येकबालकस्य प्रत्येक-बालिकायाश्च कृते संस्कृतशिक्षणमनिवार्यं भवेत् ।

३—प्रस्तावः—संस्कृतभाषाया अवज्ञां दृष्ट्वा परिषदियं व्यथामनुभवति । तथा विभिन्नप्रान्तीयराजकीयविश्वविद्यालयसमूहस्य स्वायत्तशासनशील-म्युन्स-पलेटी–डिष्ट्रिक्टबोर्डविभागस्य चाधिकारिणः प्रार्थयति यत्ते निजवार्षिकायव्य-यनिर्धारणसमये संस्कृतभाषाया उन्नत्यै प्रचाराय च यथेष्टमर्थं व्यवस्थापयेयुः ।

४ प्रस्तावः—संस्कृतभाषायाः प्रवर्त्तमानह्रासनिराकरणार्थं यच्छपराप्रति-निधिमण्डलं छपरानगरे समागतेन विहारोत्कलशिक्षामन्त्रिमहोदयेन १९३३ तम-वर्षीयदिसम्बरमासे मिलितमासीत् तत्सम्बन्धे परिषदियं विहारोत्कलशिक्षा-विभागाधिकारिणां ध्यानमाकर्षति प्रार्थयति च शीघ्रतां विधातुम् ।

इमे च किल सर्वे प्रस्तावाः सभ्यैरैकमत्येन स्वीकृताः ।

अनन्तरं देवभाषा एव 'राष्ट्रभाषा भवितुं योग्या' इति प्रस्ताव विषये विचारपूर्णा बहुशो लेखाः पठिता अभूवन् ।

ततः परं मोदफलपुरमहाविद्यालयस्याध्यापकानां पण्डितश्रीयमुनाप्रसादत्रिपाठिमहोदयानां श्रीवैद्यनाथप्रसाद बी० ए० महोदयानां च संस्कृतगौरवविषयकं सारगर्भितं व्याख्यानमभवत् ।

सर्वतन्त्र-स्वतन्त्र-षड्दर्शनाचार्य्य पण्डितराज-श्रीपद्मनाभ-शास्त्रिभ्यः

सम्मानपत्रप्रदानम् ।

श्री १०८ श्रीमज्जगद्गुरूणां श्रीवैष्णवाचार्य्याणां प्रतिवादिभयङ्कराणां श्री मदनन्ताचार्य्यस्वामिनां सभापतित्वे सनातनधर्मावलम्बिनां हिन्दूनां परिषदेका श्रीवेङ्कटेश भगवतो भव्यमन्दिरे भाद्रपद कृष्णनवम्यां प्रकाण्डपण्डितेभ्यः काशीस्थेभ्यः श्रीपद्मनाभ शास्त्रिभ्यः सम्मानपत्रप्रदानार्थं मोहमय्यां समजनि । परिषद्यस्यां माननीयाः पं० श्री रमापतिमिश्राः, रायबहादुर श्री परांडे न्यायाधीशाः, विल्सन कालेज प्रोफेसर श्री भार्गवशास्त्रिणः, श्री वीरशंकर शास्त्रिणः व्याकरण-साहित्याचार्य्याः, पण्डित श्री मुनिचन्द्रजी न्यायाचार्य्याः, पं० श्रीनिरीक्षणपति व्याकरणाचार्य्याः, पं० श्री आशुतोष भट्टाचार्य्यन्यायाचार्य्याः, श्री मनुभाई चन्द्रविद्यानन्द पण्ड्या एम० ए० एल० एल० बी० सोलिसिटर, श्री मगनलाल लखधर जे० पी० यू०, अच्युताश्रमस्वामिनः, श्रीमोतीराम कल्याणजी शास्त्रिणः विद्यासागराः, व्या० वा० श्रीधनंजय मुरारिपांधि महाशयाः सनातनधर्ममार्तण्ड-धर्माचार्य्ये तर्कालंकार-श्रीरेवाशंकरमेघजी पुरोहित शास्त्रिणः अन्ये, च सहस्रशो विद्वांसः सद्गृहस्थाश्च समुपस्थिता आसन् ।

काशीस्थ श्रीभारतधर्ममहामण्डल,-संस्कृतसाहित्य समाज,-परिव्राजक महामण्डल-जामनगर,-राजकोट प्रभृति प्रसिद्ध धर्मसंस्थाभ्यः सम्मानसमर्थक तडित्पत्राण्यपि समागतान्यासन् ।

चिराय सनातनधर्मकार्ये संलग्नानां सर्वदर्शनशास्त्रे प्राविण्यवतां, 'त्यागेनैके अमृतत्वमानशुरिति' वचनानुसारं सर्वस्वव्यवहारमपहाय धर्मरक्षामेव स्वकर्तव्यं मन्यमानानां पण्डितराज श्रीपद्मनाभशास्त्रिणां सम्माननिमित्तेन तेषां विविधधर्मकार्यदक्षतादर्शकानि विद्वद्व्याख्यानान्यभूवन् ।

संहतिः कार्यसाधिकेति नयेन सर्वैः संघीभूयोपस्थितानां धर्मापत्तीनां प्रतिकारोऽवश्यं विधातव्यः, ईदृशानां च धर्मसेवकानां स्वकार्यदार्ढ्यार्थं समेधनीयः

समुत्साहः सम्मानपत्रप्रदानादिकेन विधिनेति सर्वेषां व्याख्यानानां सारांशः ।

अन्वर्थस्वनामभिः प्रतिवादि-भयंकरैः श्री मद नन्ताचार्य्यवर्यैस्त्विदं प्रतिपादितं यदस्माभिर्न केवलं मानपत्रप्रदानमेव कर्तव्यं, किन्तु-एषां धर्मकिङ्कराणां कार्यमार्गे साहाय्यमपि प्रदाय सदनुकरणमपि विधातव्यमिति ।

मोहमयीस्थाः प्रायः सर्वेऽपि विद्वांसः समुपस्थिता आसन्नस्य परिषदि ।

यत्सम्मानपत्रं तत्र वितीर्णं तदन्यस्मिन् अङ्के सत्यवसरे मुद्रितम् भविष्यति ।

—:o:—

वेदपुराणयोरेकवाक्यता।

श्री दीनानाथ शर्मा सारस्वतः शास्त्री।
(मुलतानस्थ—स० ध० कालेजाध्यापकः)

क्रमागता

वेदविषयेऽन्यविधविसंवादो निशम्यताम्—ऋग्वेदादिसंहितानां मन्त्रसङ्ख्यायामेव बहवो मतभेदाः। अनुवाकाऽनुक्रमण्यनुसारम् ऋग्वेदमन्त्राः १०५८० मन्यन्ते, छन्दः सङ्ग्रहाऽनुसारं १०४०२, गायत्र्यादिगणनाऽनुसारं १०१४२, सायणाचार्य्याऽनुसारम् ईषदधिकं दशसहस्रम्, स्वामिदयानन्दमते १०५८९, पं० शिवशंकर (आर्यसामाजिक-) मताऽनुसारं १०४०२, सर्व्वाऽनुक्रमणिका भूमिकायां १०४४२, सर्व्वानुक्रमणी-विवरणकार-पं० जगन्नाथमतेन १०४५२, चरण-व्यूहटीकाऽनुसारं १०४७२, सत्यव्रतसामश्रमिमतानुसारं वालखिल्यमेलने १०५२२ एवन्तु १०४४२, वर्त्तमानऋग्वेदसंहिताऽनुसारञ्च १०४४० मन्त्राः, 'आर्य्यडायरी' मतेन १००८९ मन्त्राः॥ एवमथर्व्ववेदे (वैदिक प्रेस अजमेर) सूक्तानां संख्या ७३१, सायणभाष्ये तु ७५९, मन्त्रसङ्ख्या उभयोरेव ५९७७ अन्यत्र मुद्रिताऽथर्व्ववेदे मन्त्रसङ्ख्या ५९३७, सातवलेकरमतेन ७०० सङ्ख्या, शेषमन्त्रा अस्मिन् ऋग्वेदादितो गृहीताः, स्वामिहरिप्रसाद-वैदिक-मुनिमतेन ६००, 'आर्य्यडायरी'-मतेन ६००० आसन्ना अथर्व्वमन्त्राः॥ यजुर्व्वेदस्य मन्त्रसंख्या यजुःकल्पतरौ १९७५, स्वा० दयानन्दमते १९७५, सातवलेकरमते १४००, पं० शिवशंकर-काव्यतीर्थमते ९८७ शिष्टाः ९८७ ऋग्वेदस्य, स्वामिहरिप्रसादमते १०००, 'आर्यडायरी'—मतेन १९७४॥ सामवेद-मन्त्र-सङ्ख्या तुलसीरामस्वामिमते १८७३, वैदिक प्रेस अजमेर पुस्तके १८२४, अकारादिवर्णक्रमाऽनुसारम् १८९३, जीवानन्द-विद्यासागर-मुद्रिते—१८०८ शिवशंकरमते ७८ शिष्टा ऋग्वेदतो गृहीताः, प्राणशंकरत्रिवेदमते २१९, सातवलेकरमते ७०, सायणमते केवलसामवेदीयमन्त्राः ७५ अन्ये ऋग्वेदतो गृहीताः, पाश्चात्य विद्वन्मते ७५. स्वामिहरिप्रसाद वैदिकमुनिमते ७०; 'आर्य्यडायरी'-मतेन १५४३ साममन्त्राः। हं हो! कियान्मतभेदोऽल्पसंख्याकमन्त्रवतामपि वेदानां मंत्रसंख्यायाम् आर्य्यसामाजिकानामपि परस्परम्। इमामपि सीमानमतिक्रम्य गता — केचिदार्य

सामाजिकसज्जनाः, ते अथर्ववेदे कुन्तापसूक्तं, सामवेदे आरण्यकपर्व्व महानाम्न्यार्च्चिकञ्च, ऋग्वेदे वालखिल्यं (दृश्यतां 'वेदसर्व्वस्वस्य प्रथमभागः) च प्रक्षिप्तं मन्यन्ते, वालखिल्यञ्च ऋग्वेदे सायणाचार्येणाऽपि न व्याख्यातम्। शुक्ल यजुर्वेदे च क्वचिद् २ ब्राह्मणभागवचनानाम् (यजुः १९, १२, ८४।१, ३०।५ इत्यादिसूक्ते) प्रक्षेपं सर्व्वाऽनुक्रमणीकारोऽपि पुष्णाति, कृष्णयजुर्व्वेदे 'ब्राह्मण' मिश्रणन्तु स्पष्टमेव। एभ्योऽप्युन्नतिमिता केचन जना येऽथर्व्ववेदे भूतप्रेत पिशाचादिमणिमन्त्रौषधाऽभिचारादिकर्म्मनिरूपणं सनातनधर्म्मस्थ-सकलसिद्धान्तमण्डनञ्च दृष्ट्वा तदर्व्वाक्तनतां गुप्तरूपेण मन्तुं सन्ति प्रवृत्ताः। तदीयपाश्चात्यदशकाण्डानि त्वर्व्वाचीनानि परिशिष्टानि वा 'वैदिकमुनि' रपि मन्यते।

इतश्च बह्व्यो वेदशाखा लुप्तास्सन्ति, या अद्यत्वे न प्राप्यन्ते। यदि नियतसङ्ख्याकस्य— (अल्पपरिणामकस्या—ऽपि) वेदस्य भूयिष्ठरक्षायामपि तदीयेदृशी दुरवस्था, तदाऽनियतसंख्याकेषु बहुपरिणामकेषु वा उपपुराणौपपुराणभागभागिषु पुराणेषु यदि क्वचिदेवं दृश्यते; तर्हि वेदाऽनुकूलेषु तेषु किमाश्चर्य्यम्। मध्यकाले वेदस्याऽऽदर्शपुस्तकमेकमेव मिलितं 'जर्म्मनी' मुद्रितम्; तथाऽपि पाठभेदस्येदृशी दशा; यदि पुस्तकान्तराण्यपि अमेलिष्यन्; तदावश्यं प्रकरण-क्रमभंगोऽप्याशास्यमानोऽभविष्यत्। किञ्च पुराणेषु प्रक्षिप्तता स्वेच्छाऽनुसारन्न भवितुमर्हति। यदा किलोपक्रमोपसंहाराऽभ्यासोपपत्त्यपूर्वता-फलाऽर्थवादादिशाणेन घर्षणे कृते, पुराणनियतपरिणामतो व्यत्यासे दृष्टे च प्रक्षिप्तता शिद्धयेत्तदैव प्रक्षिप्तता साधयितुं शक्येति प्रागुक्तम्। परं तत्राऽप्यस्माकन्नाऽधिकारो यत्तं क्षेपकं पृथक् कुर्व्वीमहि। यानि क्षेपकवचनानि तत्र; तान्यपि पुराणोक्तवचनानां पुष्ट्यर्थं वा स्पष्टताऽर्थं वा प्रायस्सन्ति। कानिचिच्च तत्तत्पुराणे पुराणान्तर-वचनानि उपपुराणवचनानि वा तत्र तत्र मिश्रितानि। अमरकोषेऽद्यत्वे क्षेपकपद्यानि सन्ति, किमेतेन तदीय दुष्टता जाता? प्रत्युत तेषां ततो निष्कासनमेव हानिकर्तृ स्यात्। प्रत्युताऽहन्तु अभिलषामि, यद् अमरकोषेऽन्येऽपि श्लोकाः क्षिप्येरन्, येनाऽमराऽप्रोक्तपर्य्यायवाचकानां पूर्तिः 'गागर में सागर, इति भणितिश्च सफलीस्यात्, येनाऽनेनैकेनैव कोषेण सर्व्वकोषकृत्यं निस्सरेत्। केवलं क्षेपकचिन्हमात्रं देयं स्यात्। एवं पुराणेष्वपि क्षेपकवचनानि लाभदायकानि अथ च स्पष्टता कर्तॄन्येव। तेषामुच्छेदाधिऽकारो नाऽस्माकम् कदाचिद्भविष्यत्वनुसन्धानेन तान्यप्रक्षिप्तानि युक्तानि च सिद्धयेयुः। तानि च वचनान्यधिकारिभेदेन

योजयितुं सुशकान्येव । वस्तुतस्तु सर्व्वपाठभेदयुक्तमेत्र पुराणं मान्यम् वेदेऽपि यत्र तत्र पाठभेदा दृत्ता: सन्त्येव । अस्तु— ।

कथनस्येदमेवाऽभिप्रेतम्, यत्—सन्दिग्धवचनानां तात्पर्य्यञ्ज्ञातुमुपक्रमोपसंहारयोर्दर्शनस्याऽवश्यमावश्यकता भवति, नतु केवलम् एकं द्वे त्रीणि वा पद्यानि प्रकरणात् पृथक् कृत्वा निदर्शनेन तेषा–मप्रमाणताऽश्लीलता वा विज्ञसमाजे समादृता स्यात् ।

अत्रेत्थमवसेयम्—

'स्वकीयाञ्च सुतां ब्रह्मा विष्णुदेवः स्वमातरम् ।
भगिनीं भगवाञ्छम्भुर्गृहीत्वा श्रेष्ठतामगात्,

—भविष्यपुरा० प्रतिसर्ग खं० ४, अ० १८ श्लो० २७.

एतदादिकश्लोका ☓ प्रकरणात् पृथक् कृत्वाऽपठितजनताया अग्रे यदा स्थाप्येरन् (यथा चाऽद्यत्वे स्थाप्यन्ते छद्मसद्धर्मभिरव्वार्गिभिः), तदा तेषामापाततो विरुद्धाऽर्थं ऽसनमश्लीलता वा प्रतीयते । सर्वे एव वक्तुं प्रवृत्ता भवन्ति पुराणानाम द्रष्टारो विद्वांसोऽपि; यद्धन्त ! पुराणेषु देवानामित्थं श्रेष्ठता ? बत !!! परं यदाऽस्य सर्व्वमुपक्रमोपसंहारात्मकं प्रकरणं प्रदर्श्येत, तदा छलिनामाक्षेपकाणां मुखभंगो भवति, यथा—

'चतुर्द्धा प्रकृतिर्देवी गुणभिन्ना गुणैकिका ।
एका सा प्रकृतिर्माता गुणसाम्यात् सनातनी । २३ ।
सत्वभूता च भगिनी, रजोभूता च गेहिनी ।
तमोभूता च सा कन्या, तस्यै देव्यै नमो नमः । २४ ।
बहवः पुरुषा ये वै निर्गुणाश्चैकरूपिणः ।
चैतन्या ज्ञानवन्तश्च लोके प्रकृतिसम्भवाः । २५ ।
अलोके पापजाः सर्वे देवब्रह्मसमुद्भवाः ।
या तु ज्ञानमयी नारी वृणोद् यं पुरुषं शुभम् ।
कोऽपि पुत्रः पिता भ्राता स च तस्याः पतिर्भवेत् । २६ ।
स्वकीयाञ्च सुतां ब्रह्मा, विष्णुदेवः स्वमातरम् ।
भगिनीं भगवांञ्छम्भुर्गृहीत्वा श्रेष्ठतामगात् । २७ ।

एतदुपक्रमोपसंहारे श्राविते सति ज्ञातम्भवति—कीदृशी प्रकृतिः सुतापदवाच्या कीदृशा च भगिनीमात्रादिशब्दवाच्या, ब्रह्मविष्णुशिवानां च किंगुणवती प्रकृतिः । दयाऽश्लीलता ततः पलायते । परं 'वादी भद्रं न पश्यति' इति नयेन कपटपटव पुराणस्य चिरत्नाः सपत्ना कथमेतत् कुर्व्वन्तु नाम । एवमेव 'स्वसुर्यो जार उच्यते' ऋ० ६।५५।४ अत्राऽपि यदि पूषदेवताकं प्रकरणं न दृश्येत; तर्ह्यर्थस्याऽनर्थः सम्पद्येत । एवमेव प्रकरणे सर्व्वथोपेक्षिते—शतमदीनाः स्याम, यजुः ३६।२४ अत्र मौहम्मदानां 'मदीना' इत्यस्य, 'ईशावास्यमिदं' । यजुः ४०।१ अत्र ईसामसीहस्याऽपि च वैदिकता स्यात् । एवमेव 'नेन्द्रो अस्तीति नेम उ त्व आह, क ईं ददर्श कमभिष्टवाम' ऋ० ८।१०० (८९)।३ इदं मन्त्रमात्रमेव दृश्येत यदि, तर्हि प्रत्येष्यते, यद्-वेद इन्द्रस्याऽभावमेव मन्यते, यदा च—'अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि मह्ना' ऋ० ८।१००।४—अयं तदनन्तरो मन्त्र पठ्यते, तदैव प्रतीयते, यद्-वेद इन्द्रस्याऽभावं न मनुते, किन्तु भावमेव ॥ एवमेव वादिनो मनुस्मृतौ नियोगं ९।५९-६० श्रावयित्वाऽग्रे तत्खण्डकानि—'नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः । अन्यस्मिन् हि नियुञ्जाना धर्म्मं हन्युः सनातनम्' मनुः ९।६४ 'नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् । न विवाहविधावुक्तं विधवावेदनं पुनः' मनुः ९।६५—इत्यादि प्रमाणानि निह्नुवते । एवञ्च उपक्रमोपसंहारेऽश्राविते

'वैश्यकर्म्म च यो विप्रो लोभमोहव्यपाश्रयः ।
ब्राह्मण्यं दुर्लभं प्राप्य करोत्यल्पमतिः सदा ॥
स द्विजो वैश्यतामेति वैश्यो वा शूद्रतामियात् ।
स्वधर्म्मात् प्रच्युतो विप्रस्ततः शूद्रत्वमाप्नुयात् ॥

ब्रह्मपु० २२३।१६-१७ । क्रमशः

श्रीरामचरितशिक्षावलिः।

बाल्ये तु कौशिकमुनेर्मखविघ्नकार-
दुर्दान्त दैत्यदमनीय समुद्यतोऽभूत्।
प्रस्तूयते जगति रामनरः स सर्वैः
प्राप्नोति कीर्तिमतुलां हि परोपकारी।

(१)

सीतास्वयम्वरसमागतराजवृन्दं
न्यक्कृत्य चन्द्रधर-चाप-विभञ्जनेन।
रम्या विदेहतनया किल पर्यणायि
वीर्यप्रधान पुरुषः सफलत्वमेति

(२)

राज्याभिषेकमनुकाननवासवार्त्ता
श्रुत्वा मुदं न च विषादमवाप धीरः।
एतादृशो जगति को नु सहिष्णु रासी-
ल्लोकोत्तरं हि चरितं शुचिमानसानाम्

(३)

मातुः पितुश्च वचनप्रतिपालनाय
प्रेमाकुलानुजसुपत्निसमं प्रसन्नः।
त्यक्त्वा सुखानि नृपालकुलोचितानि
प्रागाद्वनाय गुरुवाङ्नहि लङ्घनीया

(४)

वन्यामहो-मुनिमतंगविशिष्टशिष्या-
मन्विष्य भिल्लकुलजां करुणाकरेण।
आस्वादितान्युपहृतानि तया फलानि
प्रेम्णः परं किमपि वस्तु वरं न लोके

(५)

प्रातुं दशाननहृतां मिथिलेशपुत्रीं
सख्यं विधाय सहसापदि वानराणाम्।
लब्ध्वा च तामगमयन्निजराजधानीम्।
किं किं न सिध्यति नरस्य शमूहशक्त्या

(६)

यो वै पुलस्त्यकुलरत्नविभीषणस्य
त्राताऽभवन्नवरः शरणागतस्य।
लंकाधिपत्यमददत्सुसमीक्ष्य चैनम्
धर्मो ह्ययन्तु शरणागतपालकानाम्

(७)

सर्वे स्वधर्मनिरताः सुखिनो नराः स्यु-
र्वाग्देवतोन्नतिपराश्छलपापहीनाः।
निर्वैरिणः श्रुतमिदं रघुवीरराज्ये
चैतादृशो हि नृपतिः परिसेवनीयः

पण्डित विनायकराव भट्टस्य (छत्रपुरम्)।

मधुरालापः

ले०—केदारनाथत्रिपाठी (गोलास्थः) [क्वींस-कालेज, काशी]

अथानिलैः कम्पित-सुप्रसूने, मन्दैस्सुगन्धैस्सुखदैः कदम्बे।
विराजमानो नवनीतचौरो, गोविन्दनामा विजयं करोतु॥

[नारायण मुकुन्द गोविन्दाख्यत्रयोऽभिन्नहृदयाः सुहृदः सन्ति ; प्रातःकाले ते स्वस्वगृहान्निर्गत्यैकीभूय धार्मिक-नैतिक-सामाजिकादिविषयोपरि समालपन्ति] ।

उषःकालिकोऽयं कालः । कुमुदिन्यो रमण-रमणसुखमनुभूय प्रियसहचरी निद्राया अङ्कमाविविशुः । अरविन्दवनं क्षणदा-क्षण-शयनं विधाय किमपि लापार्थमुद्यतो भवति । शयन-सुखमनुभवन्ति पेचकाः । सानन्दाः कोकाः समभवन् । रजनीनायको निशीथिनी-रतिश्रमं दूरीकर्तुमनाः शयनागारमारुरोह । भगवान् भास्करोऽपि विश्रामानन्तरं प्राचीगवाक्षमार्गेण रजनीरमणीरतिसुप्तान् जनान् पश्यति ।

[एतस्मिन्रमणीये समये तरङ्गिण्याः कूले निकुञ्जे नारायणमुकुन्दौ परस्परवार्तालापेन माधुर्य समवायसमवायितेन हृत्तन्त्रीं सुखयतः]

नारायणः --मित्र मुकुन्द ! सम्प्रति सर्वश्रेष्ठस्या आर्यजातेरवस्था यादृशी न तादृशी कस्या अपि जातेः ।

मुकुन्दः—वयस्य ! किमधिकेन ; सर्व एव सदाचाराचरणमांगलिकार्यान्वयसमुल्लसिताः सानातनिकीं परिपाटीं परित्यज्य पेरिससभ्यतां स्वीकुर्वन्ति, (भारतवर्षोऽपि,पेरिससस्यादित्यभिलषन्ति)

नारायणः—मित्र ! ते विविधान् नियमान् विधातुमीहन्ते, विधवाविवाहादौ राजकीयनियमो भवेत्तत्र विषये इत्यपि वाञ्छन्ति ।

मुकुन्दः—विधवा-विवाहं प्रयतन्ते ; पुनरपि सर्वेषां सर्वत्र विवाहस्स्यात्-अर्थात्—विवाह-विषये जातिरेव नापेक्षिता ।

नारायणः—जातिस्तु कुत्रापि नापेक्षिता; अपि कण्टकायते सा तेषां मार्गे ।

मुकुन्दः— अधुनैव गान्धि-महाशयस्य पुत्रस्य देवीदासस्य राजगोपालाचारि-नामधेयस्य विप्रकुलदोषाकरस्य कन्यकया सह परिणयोऽभूत् । यो हि सहृदय हृदयाब्जे चन्द्रहासायते ।

नारायणः—एतेन वर्णाश्रमि-जनतायां समुत्पन्नः कोलाहलो महान् । दुःखं वितरति खलु वार्तेयम् ।

मुकुन्दः—सत्यम् ।

नारायणः—जर्मनदेशे भारतवर्षमनुकृत्य "आर्यानार्यविवाहविच्छेदको नियमोऽपि निबद्धः ।

मुकुन्दः—श्रूयते ।

नारायणः—राष्ट्रास्सर्वे भारतवर्षस्य सभ्यतामनुकुर्वन्ति ; किन्तु खेदावसरो यदत्रत्या जनाः पेरिस-सभ्यतामेव।

मुकुन्दः—हा धिक्, धिक् तानीदृशा ये।

नारायणः- किं कथयामि गान्धि-महाशयं, राजनीतिज्ञोऽपि कृतवानेवम्।

मुकुन्दः—प्रिय मित्र नारायण ? गान्धि-महाशयो नीति-शास्त्रे न हि चतुरः। सोऽपि पेरिस- सभ्यतायाः पूजकः।

नारायणः—वयस्य मुकुन्द ! एवमाचरणेन वर्ण-दूषका भविष्यन्ति, तदा राष्ट्रस्य महती हानिः।

मुकुन्दः—नहि शङ्कासन्देहलेशः। प्रतिपादितम् भगवता तत्रभवता मनुना निर्झरनिःसरणशीलेन पद्येन—

यत्रैते हि परिध्वंसा जायन्ते वर्णदूषकाः।
राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव प्रणश्यति ॥

नारायणः—पूर्णावतारेण वृन्दावन-विहरणपरायणेन योगीन्द्रवर्येणापि

संकरो नरकायैव कुलघ्नानां कुलस्य च।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रिया॥
दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः॥
उत्सन्न-कुलधर्माणां मनुष्याणां जनार्दन।
नरके नियतं वासो भवतीत्यनु शुश्रुम ॥

मुकुन्दः—नागतवान् गोविन्द इदानीम्।

नारायणः—केनापि कारणेन भवितव्यम् ; गन्तव्यं तत्र।

[द्वे मित्रे गोविन्द-गेहम् गत्वा तारस्वरेणोचतुः।]

ना० मु०—हे मित्र गोविन्द ! आगच्छ शीघ्रम्। रक्त-रश्मिभिस्तुङ्गगिरिशृङ्गान् पादपाग्रभागान् खालंकारचन्द्रचुम्बनशीलाट्टालिकाश्च मण्डयति भगवान् कमलिनीवल्लभः।

[आकर्ण्य वचो गोविन्द शयनादुत्थाय तयोरन्तिकमागत्य ताभ्यां पृष्टस्समस्त मुदन्तजातम् प्राचकथत्]

गोविन्दः—किमपि रमणीयतममुद्यानं संविभ्राजते। सारस-कारण्डव-चक्रवाक-राजहंस-मल्लिकाक्ष-मण्डूरवाकुलेऽत्रत्ये सरसि कुमुदिनी कामिनीव मलयपवनान्दोलितपरभृतिकीरालिकुल-पीपी-कलकलरवव्यापृतरसालकिसलयरम-

णीयतममञ्जरीमकरन्दा वादनोन्मादिनोऽलिकुलानाह्वयन्तिस्म । उडुम्बर कोविदार शारद-मालूर-किंशुक-कोली-नीपार्जुनपूति-काष्ठ-शोभाञ्जन-मधुशिग्रु- शम्याक-जंभल-वञ्जुल करकादिपादप-स्थ परभृतरुतेनापूरितमासीत् । यूथिका-जयन्ती- हेमपुष्पिका-मालती-मल्लिका-भूकमलचाम्पेयोत्थित सौरभ सुरभित-समीरो मन्दं मन्दं वातिस्म । विभ्रमा ससंभ्रमा चन्द्र-चन्द्रिका रजनीसुखमनुभवतिस्म । पञ्चशर शरव्यतया मुग्धा प्रमुग्धा माधवी भगवन्तं विषम-शर मनङ्गं समालिङ्गितुं संव्याकुलाऽऽसीत् । लवंगलतिका वारांगनेव मधुकर-समुदाय मात्मसाद्विदधाति स्म ।

एवंभूते सुमनोहरे मनोहरे समये यामिन्या मेतस्यां रमणीयतमायां काऽपि भुजंगमश्रेणी धराकुरंगनयना सहस्रदलारविन्दधराधरा श्रीजननी समुद्धृत विशदरत्ना मण्डनामण्डिता कमनीय-कान्ति-कलित-कलेवरा चामीकरकलश कुचविनम्राऽभिरामा विधातुर्धातुः प्रथमा सृष्टि रिव षोडशवर्षदेशीया बाला मन्दगत्या राजहंसं लज्जयन्ती भ्रमति ।

आकृत्या संलक्ष्यतेऽस्या इयं पुरातनकालीनसभ्यसमाजसमभिनन्दित-सुन्दर धर्मसद्भावा भाग्येनावधीरणामापन्ना निवासमभिलषन्ती चन्द्रचन्द्रिका समुद्भासित विपिनसमीरण संमिश्रितरागेण "क्व स्थानापन्ना भवामि" इति समालपतीव ।

एतस्मिन्नन्तरे "हे मित्र गोविन्द ? आगच्छ शीघ्र" मित्यादिप्रेम गर्भित-स्वातिबिन्दुवाक्यकदम्बकमाकर्ण्य परित्यजामि भगवत्या निद्रादेव्या अङ्कं ।

निवेदनम् ।

बहूनां ग्राहकाणां कार्य्यालयेऽस्मिन् सूर्य्योदयस्य दशमवर्षीयैकादशद्वादशाङ्कयोः कृते पत्राणि समागतानि । तत्र सर्वत्रैव तौ अंकौ सदैव प्रेषितौ । येषां पार्श्वे नोपस्थितौ स्यातां ते अक्टुबर मासस्य १५ पञ्चदशतिथिं यावत् कार्य्यालये सूचयित्वांकोपलब्धिं कर्तुमर्हन्ति । अस्माभिः पृथक्पत्राणि तेषां पार्श्वे व्ययसङ्कोचात् न प्रेष्यन्ते । सूर्य्योदयस्य विलम्बवशात्तेषां महोदयानां व्यर्थमेव पत्रप्रेषण-व्ययो जात इत्यस्माकमस्ति महान् खेदावसरः ।

कार्य्यालय व्यवस्थापकः ।

भट्टमहाभागानां समाधिः।

(१) ले०—'अन्तर्यामी'।

'रत्नाकर' सम्पादकैर्भट्ट श्री मथुरानाथ शास्त्रिभिः 'अहो साहसम्' इति लेखस्य स्वपत्रेऽप्रकाशन-विषये 'रत्नाकरे' ३।२ समाधिः कृतः। तत्रेदं निवेदनम्—यदि सत्यं तैरसौ लेखः 'प्रकाशयितु मैच्यत'; मयैव किल 'रभसोत्तेजितेन' सोऽयं लेखः 'सूर्य्योदये' प्रकाशितः, तर्हि तु सत्यं मम रभस एव। परं मया चिरकाल-प्रतीक्षणोऽप्यमुं लेखं तत्र प्रकाशित मनिभाल्य अन्यदेवाऽनुमितम्। तदेतद्, यद्-अयं लेखस्तैरस्वीकृत एव, यतो यदा भट्टमहाभागानामेव प्रायः प्रत्यङ्कं लेखद्वयं लेखत्रयं वा 'रत्नाकरे' तिष्ठति, तेन मयाऽनुमितं यत्—तेषां पार्श्वेऽन्यदीय लेखानां न्यूनताऽस्ति। न्यूनतायामपि यत तैरयं लेखो न प्रकाश्यते, किन्तु स्वलेखै 'रत्ना-कर' स्तुन्दिलः क्रियते, तेन मदीयोऽसौ लेखस्तै र्न स्वीकृत इत्यनुमानस्याऽवसर आसीदेव। अन्येयमपि शंकोपस्थिता यद् 'रत्नाकरः' सामयिकमत एव शीघ्र प्रकाशनीयश्चाऽपि लेखं यदद्याऽपि न प्रकाशयति; कदाचन तल्लेखप्रकाशनेन स स्वलघिमानं बुध्यमानः स्यात्। पश्चादस्य सामयिकस्य लेखस्य यातयामता मा भूदिति तस्य लेखस्य 'सूर्योदये'-नाऽपि सम्बन्धमाकलय्य तत्रैव प्रकाशनाय प्रेषित इत्यपि 'रभसोत्तेजनायां' बीजम्। यद्यपि 'प्राप्तमात्रा' एव सर्व्वे लेखा लेखकानां न प्रकाश्यन्ते, तथापि सामयिकास्तु यथासम्भवं तत्कालमेव प्रकाश्यन्ते, अन्यथा पश्चात्तेषां वैरस्यं स्यात्। सामयिकता चाऽस्य सद्यो 'रत्नाकर' मुद्रितलेखस्याऽपहा-रप्रदर्शने आसीत्। तदुत्तरन्तु पाठकानामपि विस्मृतौ, कालातिपाते च जाते वैरस्यं भवति-इति 'भुक्तभोगा' विजानीयुः।

अग्रे श्रीमन्तः प्रकाशकमहोदयाऽभिमुखतः समादधति, यद्—'नाऽसौ 'सूर्य्योदय' स्य सर्वा अपि संख्याः प्रतिक्षणमक्ष्णोर्नर्त्तयति, नाऽपि सम्पादक एव सर्वसूक्तीः कण्ठस्थीकुरुते' इति। तत्रेदं निवेदनम्—यदा श्रीमत्प्रकाशकैः 'अहो साह-सम्' इति 'सूर्य्योदये' १।२३ अन्यदीयलेखाऽपहार उद्घुष्टः; तर्हि तच्चिरकालमुद्रित-पुस्तकं किं तैः 'प्रतिक्षणमक्ष्णोर्नर्त्य तेस्म'? श्रीमद्भिरेव 'भट्टमहाभागैः' प्रथमवर्षीय

(१) श्री 'सूर्योदय' सम्पादकाः प्रणम्यन्ते।
कृपया इमं लेखं 'सूर्योदये' शीघ्रं प्रकाश्यानुगृह्णन्तु।
भवदीयः— लेखकः।

'रत्नाकराऽष्टमांऽके' 'श्री' पत्रद्वितीयवर्षीय-प्रथमसंख्यामुद्रितस्य 'अस्माकं मातापितरौ' इति लेखस्य पुरातन 'रत्नाकराद्' अपहारः सूचितः; प्रत्युत—'विशेषतश्च अधुनैव प्रचलितानां पत्राणां पक्षे नैतत्प्रतिष्ठायै' इति 'श्री' पत्रप्रकाशकः श्रीमद्भिरप्यधिचिप्तः; तत् किं श्रीमन्तोऽपि 'रत्नाकर' स्य दशवार्षिकीः सर्वाः संख्याः प्रतिक्षणम-क्ष्णोर्नर्तयन्तिस्म ? तं लेखं वा 'कण्ठस्थीकुर्वन्तिस्म' ? अथवा 'श्री' सम्पादक एव 'अस्माकं मातापितरौ' इति प्राचीनलेखं कण्ठस्थीकर्तुं बाध्य आसीत् ? यदि भव-द्भिरमीभि श्च स्व 'दीर्घस्मृति' प्रख्यात्यै तल्लेखाऽपहारनिदर्शने पराक्रान्तम्, तर्ह्यत्राऽपि तदेवोपालम्भे बीजं शक्यते कल्पयितुम् ।

यदा किल 'प्रकाशक' महाभागपार्श्वे 'सूर्योदय'-पत्रमपि प्रारम्भादेव याति, तदा १।२३ संख्यायां भीषणरूपेणोपालम्भमानैरतैरते ते लेखाः कुतो न दृष्टाः स्युः ? चिरमुद्रित म० म० श्रीहरनारायणविद्यासागरस्य कविता यदि तदक्ष्णोर्नृत्यति' तर्ह्यल्पकालमुद्रिता कविता यदि तदक्ष्णोर्न नृत्यति, तर्हि किं तेषां स्मृतेर्दोषः ? तत्र मनोऽनियोगस्य वा कारणम् ? नाऽऽद्यः—चिरकालिकी तु स्मृतिस्तिष्ठति, अल्पकालिकी तु न—इति केयं व्याप्तिः ? यदि द्वितीय-कारणं मनोऽनियोगस्येति, तत्तु १०मवर्षीय 'सूर्योदय' स्य २५८ पृष्ठे २७ पङ्क्तौ तस्मिन्नेव लेखे मयाऽप्युपच्चिप्तम्, भट्टमहाभागैरतत्र कस्तावन्नव्यतोन्मेषः कृतः ?

अग्रे भट्टमहोदया नवीनोपालम्भसृष्ट्यौ विस्मयन्ते—नाऽयं नाम नवीनोपालम्भः । प्रागीदृगपहारोपालम्भसृष्टिः 'सूर्य्योदये' १।२३ म० म० श्री गि० श० महाभागैरेव प्रारब्धा ततो भवद्भिर्भट्टमहाभागै 'रत्नाकरे' १।८ 'अस्माकं मातापितरौ' इत्यपहारेण 'श्रियाः' प्रकाशकोऽधिचिप्तः । ततो यद्यस्माभिस्तेषामुपालम्भकानामेव स्मृतौ त्रुटिप्रदर्शनायाऽन्यदीयाऽपहारदर्शनेऽल्पे शब्दा उल्लिखता अपि; तर्हि केयं नवीनता नाम ? अथचाऽयमुपालम्भो नाऽऽसीत्, किन्तु तत्राऽऽश्चर्य्यप्रदर्शनं कृतमासीत्तेषां स्मृतौ ।

किञ्च—'अमुं लेखं न प्रकाशितवन्तः । इति 'सूर्य्योदय' स्थलेखान्ते लेखश्च न 'रत्नाकर' सम्पादकेषु भवत्सु कलङ्काऽङ्कनाय, प्रत्युत स्वोपरि आपतिष्यत्कलङ्क-दूरीकरणाय । अर्थाद्—यद्ययं लेखः 'सूर्योदये'ऽपि प्रकाशेत—इतश्च 'रत्नाकरे'ऽपि प्रकाशेत, तर्हि 'रत्नाकरे' १।८ प्रकाशितायाः—'अन्यपत्रेषु प्रकाशितचरं लेखं संस्कृतरत्नाकरस्य पाठकेभ्यो वयं नोपहर्तुं कामयामहे, (यद्यपि 'रत्नाकरे' एतद्विरूद्धताऽपि दृष्टा) ये एकेनैव लेखेन सर्वपत्राणामुद्धारं वाञ्छन्ति ते रत्नाकराय क्षमां दद्युः ।

इत्यादिभवत्सूचनाया विरुद्धमभियोगोऽस्मासु न प्रवर्त्तेत । तैश्च ज्ञायेत यद्दयं लेखो 'रत्नाकरे' अप्रकाशनाऽनुमानेनैव 'सूर्य्योदये' प्रेषितो न तूभयत्र यौगपद्येन प्रेषित इति ।

भट्ट महोदयानां भ्रमो न तिष्ठेदितीमाः पङ्क्तय उपनिबद्धा अस्माभिः आशासे त एतेनाऽवगतार्थाः सन्तुष्येयुरिति कृतमन्तर्गडुना विस्तरेण ।

———:०:———

काश्या विश्वेश्वर प्रार्थना ।

(ले०:—श्री गदाधर विद्याभूषण महामहोपाध्यायः (इच्छापुरम गंजाम)

काशीपुरेश ! चिरमात्म-समाधिमग्नो ।
मा भूः, कलंकितमितो निजनाम पश्य ।
तिष्ठत्यपि त्वयि विभौ भुवि विश्वनाथे
विश्वे तवैष भृतको नितरामनाथः ॥१

अन्तर्वणं दहति दुःखदवानलो मे
हंसः कुकायकुहरे परिपच्यतेऽसौ ।
गंगाधर स्त्वमिति देव निवेदयामि
निर्वापयाशु करुणामय वारिपूरैः ॥२

आपद्घनाघनघटाघनभीति-वर्षै-
श्चिन्तावितान सरितः परितः सृजन्ति ।
श्रीविश्वनाथ ! विनतोचित-पक्षपातैः
र्वातै र्निवारय च तारय मामनाथं ॥३

द्योभूदिशां पतिभिरप्यनिवार्यकष्टैः
पिष्टं न मां करुणया यदि तारयेथाः ।
विश्वप्रभो त्वदितरः कतमो मम स्यात्
त्राता मदन्य इह कस्तव तारणीयः ॥४

भागीरथीभरमणो भुजगाधिपो वा
स्याच्चेन्निशम्य रुदितानि विबोधये त्वां ।

रत्नाकराम्बर-रसातल माश्रितास्ते
नाथ ! स्वयं झटिति जागृहि पाहि भृत्यं ॥५

भारं निरीक्ष्य मम दुःख-धरा-धरस्य।
नैवार्हसि त्वमपि वञ्चयितुं परोक्षात्
नक्तं-दिवं तवदृशो र्ननु गोचरोऽहं
वेदाः प्रमाण मिह जाग्रति विश्वमूर्त्ते ! ॥६

पाषाणलिंग-वपुषस्तव निष्ठुरत्वं
दैन्यं न सोढु मलमाकलय प्रभो मे।
एतद् यदीक्षण-पथं क्षणमेव गच्छे-
द्दम्भोलि रप्यचिर मश्मसि पर्य्यवस्येत् ॥७

मा मां स्मर स्मरपरं स्वगतिं स्मरारे
हालाहलं जिगिलिष स्तवकेन शान्तिः।
दुःखाश्रु भि र्निपतीतै श्चरणे मदीयै
र्मूर्ध्नीन्दु-दिव्यसरितावपि तप्स्यतोद्धे ॥

दुःखोदितानि यदि मे सहसे सहस्व
किन्त्वग्रतो जगदधीश्वर चिन्तयैतत्।
आक्रोशवागसदृशा चरणे क्षणात्ते
सह्या भवेत्तव न वा जगदम्बिकायाः ॥ ८

एतां तव स्तवमयीं नवरत्नमालां
निर्दोष ! भव्य-गुणवर्ग ! निसर्गरम्यां।
भक्त्यार्पयामि सुमवत् कुसुमाकराय
प्रीत्या गृहाण सुमुखो भव विश्वनाथ ! ॥१०

इति किल कविना गदाधरेण
प्रविरचिता नवरत्न-मालिकेयं।
स्तुतिकर-चिर-दुःख-शोक-हन्त्री
जगति भवेज्जगदीश्वरप्रभावात् ॥११

Funding: IKS/Tattva Heritage and IKS-MoE. Digitization: eGangotri.

आधुनिकविमर्शकसमीक्षा।

ले०, पं०, घ.एडकोटोपनामा, सुब्रह्मण्यशास्त्री
गोदावरीमण्डलीयनरेन्द्रपुराऽभिजनः।

अस्तीदानीं लोके ग्रंथविमर्शकानां संख्या दीर्घतमा। एते प्रायशः सर्वविषयेष्विव विमर्शनव्यापारेऽपि विदेशीयाननुकुर्वन्ति। केचित् वेदान्, केचित् स्मृतिः, केचित् पुराणानि, केचित् प्राचीनकाव्यपद्धतिं च, नानाभंगीभिः स्वैरमितस्ततश्चालयन्ति विनैव संप्रदायसिद्धं विज्ञानं। अविदित्वै ते स्वीयां शक्तिमशक्ये कर्मणि प्रविशन्तीति महच्चित्रमेतत्। एतेन च कुविमर्शनेन न केवलमेते स्वयमेव नश्यन्ति। किं तु ये किल किंचिद्ज्ञा भूत्वा विजिज्ञासवो भवन्ति तेषामुत्पाद्य बुद्धिभेदं विनाशयन्ति धार्मिकीं प्रवृत्तिं।

सांप्रतिकाः केचन विमर्शकंमन्या अनाघ्रातवेदपरिमला अपि अनादिनिधनस्याऽपि भगवतो वेदस्य जन्मकालादिनिर्वचनं कुर्वन्ति। अयमृग्वेदकालः, तत्राऽप्यन्यस्संहितासमयः, अपरो ब्राह्मणकालः इत्यादि बहु कथयन्ति। स्वमतप्रतिकूलवाक्यानि प्रक्षिप्तानीति प्रकटयन्ति। क्वचित्क्वचिदर्थान्तरमुपन्यस्य अवैदिकं स्वीयं मतं द्रढयितुमभिलषन्ति। एतादृशानेवाऽधिकृत्य भगवान् वेदव्यास उवाच।

विभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति॥ इति,

केवलवैयाकरणानां केवलमीमांसकानान्तु अस्मयेवाहं दुर्विज्ञेया, अपि तु ये पदवाक्यप्रमाणपारावारपारीणास्त एव मदीयं वास्तवं रूपं द्रष्टुमर्हन्तीति स्वयमाह भगवती वाग्देवता ऋग्वेदीय सरस्वतीसूक्ते।

उतत्वः पश्यन्न ददर्श वाचं। उतत्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वां विसस्रे जायेव पत्य उशती सुवासाः॥ इति॥

किंच विदितसकलशास्त्राणामपि सद्गुरु-मुखात् वेदरहस्यार्थमजानतां महामहिम्नो वेदस्य मुख्यं तात्पर्यं दुर्विज्ञेयमिति यजुर्वेदीय-नृमेध-परुच्छेप संवादादवगम्यते। किमुत आबाल्यादाङ्गलभाषाऽभ्यासिनां श्रुतिस्मृति-सदाचारविमुखानां दुर्विज्ञेयमिति।

केनचित्पाश्चात्यानुकारिणा वाल्मीकीयं रामायणं विमृशता 'रामो भीमपराक्रमः' इति वाक्यस्य रामो भीमसेनतुल्यपराक्रमविशिष्टः, इत्यर्थमभिधाय रामस्य भीमौपम्येन पाण्डवकथाप्रतिपादक-महाभारतस्य रामायणनिर्माणकालात् प्राक्तनत्वं निरणायि।

कश्चन मेधावी भागवतं विमृशन् तत्र 'घोषाङ्गनाः' इति पदमवलोक्य अविदित्वा च तत्पदस्य आभीरनार्य्य इत्यर्थं 'तत्समये ग्रामटिकासु ग्राम्यस्त्रीणामेव घोषा (हिन्दीभाषायां, परदा,) आसीत्किल, न नगरेषु, न विदग्धानां, इत्यभाणीत् ।

अयि पाठकमहाशयाः । पश्यत अस्य विमर्शकस्य पाण्डित्यपाटवं । एतादृशा एवाधुना ग्रन्थविमर्शकाः शास्त्रविमर्शकाश्च । भारतदेशीयं सकलमपि वाङ्मयं विमर्शयन्ति च एतैरेव राजकीयाः मासि मासि चतुश्शतं पञ्चशतं वा वेतनं दत्वा (अहो सकलविद्याजन्म-भूमेर्भारतदेशस्येदृशी दुर्दशा हा ! कष्टम्)

विदेशीयानामास्माकीनग्रन्थविमर्शने किंवा प्रयोजनमस्तीत्यत्रोच्यते । ते खलु न सहन्ते परोन्नतिं, सर्वथा सर्वविषयेऽपि स्वीयामेवोन्नतिमाकलयन्ति । कलाकौशलस्य, विज्ञानस्य, नागरिकतायाः, सुखस्य, धनस्य, भोग्यजातस्य च, किंबहुना सर्वस्याऽपि सारवस्तुनो जन्मभूमिः स्वीयो देश इति तेषामाग्रहः । विदितमेवैतत्सर्वेषाम् यत् यतः प्रभृति ते देशमिममागच्छन्तिस्म, तदाऽरभ्य एतावत्पर्यन्तं स्तोकं स्तोकमास्माकीनं वाङ्मयं विज्ञानं च भोग्यवस्तु च संगृह्य स्वीयं देशं नयन्तीति ।

नीत्वा चाऽत्याश्चर्यकारिणीमतिप्राचीनां सर्वप्रकारां भारतीयोन्नतिं विदित्वा तामसहमानाः तद्बोधकग्रन्थेषु विपरीतदृष्ट्या प्रकल्प्याऽसदर्थं निकृष्टतामप्रामाण्यं मिथ्यात्वं च असद्धेतुप्रदर्शनेन प्रचारयितुमुद्यता अभवन्, भवन्तिच साम्प्रतमेतत्तेषां स्वोत्कृष्टतासंपादनप्रवणानाम् कृते भारतीयानां तावद्यमुद्यमो गर्ह्यतमः । एते देशान्तरीयशिक्षादोषदूषितमानसास्सन्तो विस्मृत्य स्वीयामुन्नतिं मातृभाषायाः मातृभूमेश्चावनतिमापादयन्तः एवं व्रज, एवं कुरु, एवं वद, इति शासकैरादिष्टाः पञ्जरशुकाः इव शिरांसि चालयन्तो यथाशासनं व्रजन्तः कुर्वन्तो वदन्तश्च आबाल्यादाचरमश्वासं पारतन्त्र्यतप्ततैलकटाहोदरे मज्जनोन्मज्जन-संतापमनुभवन्ति । नेहाऽस्ति ह्रीः, अमुत्र न भीः, उभयत्र न श्रीरेतेषाम् । हन्त कदा कथं कुत एतेषां मानसेषु परिवर्तनं भवेत् ।

अघटित-घटनापटीयसी खलु भगवतस्सकलचराचरगुरोरखिलबुद्धिप्रेरकस्य परमेश्वरस्य शक्तिः । स एव शरणमस्माकं । विदधातु सद्बुद्धिप्रदानेन सर्वस्याऽपि लोकस्य मंगलं सर्वमंगलासहायः ॥

[कस्यापि वेदसमालोचकस्य मतखण्डनं कृत्वा प्रेषयन्तु लेखकमहोदयाश्चेत्सहर्षं प्रकाशयाम इयन्तु भूमिकैवास्ति । सं०]

प्रतिवादपत्रम् ।

विदितमस्तु महानुभावानाम्—गतवर्षे आश्विन पूर्णिमायां प्रकाशितं सूर्य्योदयपत्रं मया-स्यामेव ज्येष्ठामायां दैवादवलोकितम् पठितंच तत्र रसूलपुरे पण्डित-सम्मेलन-शीर्षकलेखनम् । तत्र सूर्य्यपुरवास्तव्येन श्रीभगवत्प्रसाद पाण्डेयेन पदकप्रदानविषयक-लेखो यथार्थमनवधार्य्य स्वमनसैव लिखितः येन सभोपस्थितानां व्याकरणादिपुष्टाचार्य्याचार्य्यपरीक्षोत्तीर्णविदुषां मनसि संक्षोभः संजातः । अतः सर्वेषां यथार्थ वार्ता-विज्ञापनाय निवेदयामि । मया तु साहित्य-कला-कौशल-पूर्वक-कवितायाम् उत्साह-सम्पादनाय व्याकरणातिरिक्त विषय एव सर्वाणि पदकानि प्रदत्तानि तत्र श्रीशोपनाम्ने ईशदत्तपाण्डेयाय स्वर्ण पदकं प्रथम-श्रेण्याम् काशीनाथ-शिवनाथ-शर्म्मणे रजत-पदकद्वयं द्वितीय श्रेण्याम् सूर्य्यपुर-वास्तव्याय सरस्वती दत्त शर्मणे रजतपदकं तृतीय श्रेण्यां नाट्य-कलायां तु रघुपतिसिंह वर्म्मणे रजतपदकं श्रेणी-विभागं विनैव । अतो लेख व्यति क्रम-निरशनाय मम सम्मतं विनाग्रिमवर्षतो लेखो न प्रकाशयितव्यः सभाविषयको लेखः प्रत्यब्दमहमेव भवत्सविधे प्रेषयामि येन विदुषां समाजे व्यतिक्रम-जनितः क्षोभो माभूत् अन्येषां वस्तुतः सभा-कार्य्य-विवरण ज्ञानं च भवेत् इति प्रार्थना ।

भुवनेश्वर प्रसाद नारायणसिंह ।

प्रोप्राइटर रसूलपुर स्टेट ।

हरिद्वार-ऋषिकुलब्रह्मचर्याश्रमार्थम्

आवश्यकता

एकस्यानुभविनो बी० ए० एल० टी० उपाधिधारिण आंगलविदुषः यश्छात्राणां "ऐफ, ए० परीक्षोपयोगितां योग्यतां प्रतिपादयन्, तांस्तत्परीक्षोत्तीर्णान् निष्पादयितुं पारयेत् । एकस्यानुभविन इण्टर सी० टी० अध्यापकस्य, यो गणित मालेख्यमांगलगिरं च विशेषतो जानन्, इतिहास-भूगोल-पाठनेऽपि पाटवं दधीत एकस्य वाराणसेय व्याकरणाचार्यस्य साहित्यदर्शनोपदेश-निपुणस्य बी० ए० उपाधिसमलंकृतस्य कृतिनः । एकस्य हिन्दी विदुषः यो हिन्दी ऐड्वान्स परीक्षोत्तीर्णः शास्त्रि-ऐण्ट्रैन्स परीक्षोत्तीर्णश्च भवेत । एकस्य सहायकवेदाध्यापकस्य, यो वेदशास्त्री

सन् कर्मकाण्डज्योतिर्विद्ययोरनुभववान् विद्वान् भवेत् । द्वयोश्छात्रावासाधिष्ठात्रोः प्राच्यनव्यक्रीडा-निपुणयोः सेना व्यायाम (ड्रिल) मल्लसंग्राम (कुश्ती) यष्टिकासंचार-तरणोपदेश-दक्षयोः, यौ गृहस्थावतिचत्वारिंशद्वर्षवयस्कौ स्ताम् । एतादृशां भजनोपदेशकानां, ये "हारमोनियमा" ख्यवाद्येन कथा वाचयितुं लब्धप्रागल्भ्या भवेयुः, सनातनधर्म सिद्धान्त-साधने प्राप्तप्रतिष्ठाश्च स्युः । एतादृशानां महोपदेशकानां, ये सनाततधर्मोपदेशैर्जनतां रञ्जयन्तः, अपि कुलार्थमन्नार्थ-संग्रहं कर्तुं शक्नुवन्तु इति ।

प्रार्थना पत्राणि प्रमाणपत्रैः सत्रा, सम्भवं चेत्सचित्राणि प्रहितव्यानि । तेषां प्रार्थनापत्रेषु विशेषमवधानं दास्यते येषां सनातन-धर्मशिक्षालय-कार्यानुभवो ज्ञास्यते, सनातनधर्मिण एव द्विजाः (ब्राह्मण क्षत्रिय वैश्याः) पत्राणि प्रहिण्वन्तु । पत्राणि अक्टूबर मासस्य पञ्चदशतारिकां यावदवश्य मागन्तव्यानि, वेतनं योग्यता पेक्षमिति ।

ब्रजनाथशर्मा गोस्वामी (राय साहब)

अवैतनिक प्रधानमन्त्री-ऋषिकुल ब्रह्मचर्य्याश्रमस्य, हरिद्वारस्थस्य ।

——:०:——

* यतो धर्मस्ततोजयः *

* सिद्धपुरब्रह्मचर्याश्रमस्थो हरिशङ्करच्छात्रः *

इह खलु भारते युगप्रभावात् पाश्चात्य-शिक्षावशाच्चानेके प्रत्याघाता भवन्ति सनातन-धर्मोपरि । यत्र खलु प्रिय-धर्मार्थं सुतवित्तदारान् न गणयन्तः प्रियप्राणान् त्यजन्तिस्म भारतीयाः । साम्प्रतं तु धर्म एवास्माकं प्राण-विनाशक इति तन्नाशार्थमेव प्रयतन्त्याधुनिकाः सुधारकाः । त एव धर्मज्ञानशून्योच्छृंखल स्वतन्त्रोन्मादवशादीश्वरस्य धर्मस्य चास्तित्वनाशार्थं यतन्ते । प्रलपन्ति च धर्मेणश्वरेण च जगतो नाशः कृतः । तद्वशाच्च भारतवर्षस्य पारतंत्र्यंजातम् । तत्प्रभावेण च दुःखग्रस्ताः सञ्जाता भारतीयप्रजाः ।

नात्र सन्देहो यद्व स्वार्थकामलोलुपदाम्भिकैः पुरुषैः कामक्रोधादिवशाद्धर्मोपर्यनाचारः कृतः क्रियते च । मानप्रतिष्ठाधनमदान्धा दुर्बलान् कृषिकारान् भृत्यादींश्च पशुवत् पीडयन्ति । किन्त्वत्र निश्चयेन प्रतीयते यदीश्वरस्य धर्मस्य च नायं दोषः । परन्तु प्रजासु सनातनधर्माभावादीश्वरास्थाभावाच्च दोषा बर्द्धिता । यदि सर्वव्यापकनित्यशुद्धानन्दघनेश्वर-सत्तायां विश्वासः सनातनधर्मे

Funding: IKS/Tattva Heritage and IKS-MoE. Digitization: eGangotri.

च लोकानां प्रवृत्तिश्चेत्तर्हि पाखण्डादिदोषवृद्धिर्न स्यात् । किन्तु तेषु दोषेषु सनातनधर्मह्रास एव प्रधानं कारणम् । अधर्मप्रतापादेव पवित्रो भारतदेशः पराधीनः प्राणिनश्चाल्पायुषो जाताः । भूकम्पादिदैवशक्त्यैव प्राणिनो दुःखग्रस्ताः सन्तो वस्त्रान्नं विनैव प्राणान् त्यजन्ति । तदुक्तं शास्त्रे 'धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः' हतो धर्मः स्वहन्तारमेव हन्ति रक्षितश्च रक्षति' । हन्त साम्प्रतं पाश्चात्य-शिक्षापण्डिता न्यायान्यायमविचार्य्यैव धर्मस्येश्वरस्य चातथ्यां निन्दां कुर्वन्ति ।

पुरा येषां भारतीयानां पूर्वजाः शास्त्रवेत्तारः सनातन-धर्मज्ञाश्चासन् साम्प्रतं तेषामेवान्वयप्रकाशकाः पुत्राः पाश्चात्य-संस्कृतिप्रभान्वितदूषितशिक्षावशात् सनातनधर्मं न जानन्ति । अतस्तैरेव विचार्य्यताम् । यदस्माकं पूर्वजाः प्रकाण्ड-धर्मप्रचारका विगतस्पृहाश्चासन् । धर्मार्थं तैर्महानुभावैर्दुःखानि सोढानि । दैशाथ. धर्मार्थं च केन प्रकारेण तैः प्राणा अर्पिताः । तथाचोक्तं तैः । धर्मान्न प्रमदितव्यम् । सदा सर्वत्र सनातनधर्मस्यैव जयो जातः । तदुक्तं भारते यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः ॥ यत्र श्रीकृष्णस्तत्रैव श्रीर्विजयो भूतिश्चावश्यं भवति । यत्र धर्मस्तत्र श्रीकृष्णः । अतो धर्म एव सर्वेषामुन्नतिकारको हितकारकश्च धर्मलक्षणम्प्रोक्तं महर्षिणा कणादेन । यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः । येन संसारोन्नतिर्मोक्षप्राप्तिश्च भवति स धर्मः । महर्षिणा वेदव्यासेनाप्युक्तम् ।

धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः ।
यत्स्याद्धारणसंयुक्तः स धर्म इति निश्चयः ॥

तथाच मनुष्ये यदा मनुष्यत्वधर्माभावस्तदा तु स पशुसमानतां व्रजति । तमेव लक्ष्यीकृत्य भर्तृहरिणोक्तम् ।

धर्मो हि तेषामधिको विशेषो
धर्मेण हीनाः पशुभिः समानाः ।

अतो निश्चीयते सनातनधर्मोऽवश्यं सेवनीयः सर्वैः । धर्मज्ञानस्य पश्चाद् प्रतीयते यद्धर्मसेवनं तीक्ष्णासिधारासमानमतस्तदर्थं संस्कृत-विद्यावश्यकतावश्यं भवति । साम्प्रतं पाश्चात्य-विद्यायाः प्रचारप्राबल्यं वर्ततेऽतस्तत्प्रभावेण सनातनधर्मसदाचारं प्रत्यप्रीतिर्भवति, स्वधर्मे यथाकथञ्चित् श्रद्धा वर्तते सापि विचली भवति । अतो धर्मस्य शुद्धरहस्यप्रदर्शिकायाः संस्कृतविद्यायाः प्रचारोऽवश्यमावश्यकः । धर्माचरणेन शान्तिसंतोषतितिक्षादिगुणानां विकासः प्रस्फुटो भवति, नान्यथा । अतः सनातनधर्मपरायणैः सर्वैर्भवितव्यम् । विशेषेण धर्माचार्या धर्मरक्षणार्थं कटिबद्धाः सन्तो विनयादिगुणैस्सह धर्मतात्पर्यं वेद-

यित्वा धर्ममार्गतत्परान् जनान् कुर्युस्तदैव भारतस्य विजयध्वजः सदा सर्वत्राग्रेसरो भविष्यति । ईश्वराश्रयेण धर्मप्रवृत्त्या च सर्वाः प्रजा दुःखोन्मुक्ताः सत्यः परमं सुखं प्राप्स्यन्ति ।

काव्योपदेशामृतप्रवर्षि शरद्वर्णनं भट्टिकाव्ये

[ले०:—रामोदार शर्मा, आ० इ० प० छात्रः, जी० वी० वी० कालेज, वलिगांव वास्तव्यः]

नाविदितं काव्य-कुञ्ज-कुसुमचयन परायणानां संस्कृतसाहित्यारविन्दमधुमत्त-मधुपानां विपश्चिताम् यन्निर्मितं भट्टिकाव्यं व्याकरणबोधकरणाय न तु साहित्य सेविनां रसिकधुरन्धराणां सहृदयानां मनोरञ्जनाय ।

मन्यन्ते केचित्पण्डित-प्रवराः कविता-कामिनी-प्रणयिनः यदस्तीदं काव्यं कर्कश-दुराप-दुर्बोध-शब्दसनाथम् । आसीद्भट्टिः केवलं वैयाकरणः । न तु सहृदयः काव्य-रचयिता । उदीरितं साहित्यदर्पणे 'वाक्यं रसात्मकं काव्यम्' । सर्वे नेश्वराः कवीत्युपाधिना स्वात्मानमलंकरणे। तेनैव सुकविना भाव्यम् यस्य हृद्देशे कल्पना-कालिन्दी कलकलनिनादेन प्रवहति । वर्त्तन्ते च यस्य काव्येऽउपमा-प्राचुर्य्यं शब्दमाधुर्य्यं, भाव-वैशद्यं रसात्मकं वर्णनं करुणारसप्रवाहादयः । आसीदयं कविः व्याकरण-वैचित्र्यसंदर्शन एवाधिककृतोद्यमः न तु काव्यरसोत्पादने । परन्तु यत्र तत्र कल्पनोड्डानकरुणश्रृंगाररसास्तित्वं सम्प्राप्यते । द्वितीयसर्गस्थं शरद्व-र्णनमधीत्य त्वस्माकम्मनांसि जायन्ते आसादितसम्मदानि साहित्य-सरिता मधुर-प्रवाह प्लावितानि । अत्र श्लोकेष्वस्माभिः प्राप्यते कविताचैशिष्ट्यं 'कवयः किं न पश्यन्ति" इत्युक्तिः याथार्थ्यं भजन्त्यासाद्यते भट्टिपद्ये । वर्णितानि शरत्सम्भवानि विविधानि वस्तूनि काव्यरसरञ्जितानि । इयन्तु साधारणी वार्त्ता यच्छरदागमे वनस्पतयः सरांसि नद्यः, ग्रहनक्षत्रादीनि च शोभाश्रियं भजन्ते । तडागेषु कमलदलानि विकसितानि जायन्ते । भ्रमराश्चापि तेषामुपरि इतस्तत उड्डीयमाना जायन्ते । प्रथमं कीदृशं वर्णनमिति विषयीक्रियतेऽत्र श्लोकश्चाप्युद्धियते ।

तरंगसंगाच्चपलैः पलाशै-
ज्वालांश्रियं सातिशयं दधन्ति
सधूम-दीप्ताग्निरुचीनि रेजु-
स्ताम्रोत्पलान्याकुलषट्पदानि ।

उपमाऽत्र कीदृशी निभाल्यते। कमलानि कम्पितानि तरंगसहवासात्तडागे प्रतीयन्ते तानि सस्मितान्येव। कृष्णवर्णाः भ्रमराः तैस्सह विराजमानाः। रक्तकमलानां कृष्णभ्रमरैस्सह सहवासोऽतिशयां शोभामादधाति। अत एव भान्ति भ्रमराधिष्ठितरक्तकमलदलानि ज्वालायुक्ता धूमराजिसनाथा अग्नय इव। पुनश्च प्रदर्शयत्ययं श्लोकः कवि-काव्य-कौशलम्।

निशातुषारै र्नयनाम्बुकल्पैः
पत्रान्तपर्य्यागलदच्छबिन्दुः
उपारुरोदेव नदत्पतंगः
कुमुद्वतीं तीरतरु र्दिनादौ।

अनुभूतिरियं सुषमा-प्रकृति-पर्यवेक्षणस्य। स्थावराः कीदृशाः सहानुभूति-प्रदर्शका भवन्ति, इति निगदितमस्त्यस्मिन्श्लोके।

उषःकालः। समतीता रजनी। तडागजलं कुमुदिनीसनाथम्। कूजद्विहगः तीरतरुः। वृक्षपत्रस्थितहिमकणपतनम् कविरुत्प्रेक्षते यत्तीरतरुः चन्द्रविरहविधुरायाः कुमुदिन्या दयते अत एव रोदनं करोति उच्चस्वरेण।

यथा रोदनकाले जनानां जंगमानाञ्चाश्रूणि पतन्ति नेत्रकोणेभ्यः। तथैव तत्पादपस्यापि पत्रकोणेभ्योऽश्रुवद्धिमकणाः पतन्ति अहो! किमिदम्? वृक्षस्यापि रोदनम्? चन्द्रः कुमुदिनीनायक इति लोकप्रसिद्धिः। अत एव यादृशी मलिना वैक्लव्यमुपगता जायते प्रोषितपतिका नायिका, कुमुदिन्यपि स्वप्राणवल्लभे दृष्टिपथव्यतीते सति तथैव मोहापन्ना संकुचिता वा भवति।

अतो रोदिति भृशं स्वरेण दयार्द्रचेताः सततपरहितपरायणः तीरतरुः अन्तेवासिनीं कुमुदिनीं दैन्याश्रिता मवलोक्य।

अत्र वर्णितं कविवरेण यत्तरुरपि मनुष्यवद्दयाशीलो लब्धप्रश्रयश्च भवति। अत्र पादपपत्राणि नेत्रकोणैस्सहोपमीयन्ते। तुषारकणा अश्रुबिन्दुभिस्सहोपमीयन्ते। विहग-ध्वनिस्तु जन-रोदनस्वरसाम्यमुपैति।

पुनरपि ग्रामीणाः कृषकाः कीदृशं सरल-जीवनं नयन्ति इति वर्णितमस्त्यस्मिन्नधःश्लोके।

वियोगदुःखानुभवानभिज्ञैः
काले नृपांशं विहितं ददद्भिः।
आहार्य्यशोभारहितैरमायै-
रैक्षिष्ट पुंभिः प्रचितान् स गोष्ठान्॥

शरदि कृषकाः स्व स्व क्षेत्रे स्वेषां स्वेषां गा रक्षन्ति, तेषां निरीक्षणाय

पोषणाय चापि तत्रैव गोष्ठ-निर्म्माणं विधाय तिष्ठन्ति। ते कृषकास्तु सरलचित्ताः न तु कपट-क्रीड़ा-दक्षाः। ते त्वनुसारिणः शास्त्रानुमोदितमार्गस्य। ते न राजद्रोहिणः। ददति ते उचितं राज्यकरं काले आगते। ते न मण्डिताः सन्ति लैवेण्डर-फुलेल-तैलादिभिः, यथेदानीन्तना युवका अङ्गरागीय-योगङ्कुर्वन्तो वर्त्तन्ते नक्तन्दिनम्। अद्य तु बहूनां नवजनानाङ्कालः स्वात्मनः सुन्दरीकरण एव गच्छति, परन्तु कुत आयाति सौन्दर्य्यं स्वास्थ्य-रिक्त-तुण्डेषु। सौन्दर्य्यन्तु व्यायामतो जायते। ते कृषकाः कुङ्कुमाद्युपयोग-रहिताः कृत्रिम शोभा विहीनाः किन्तु मनोहर वपुषः सुस्वास्थ्येन केवलम्। कीदृशो ग्रामजीवनोत्कर्षः।

इत्थं वर्णितं शरत्सौन्दर्य्यं भट्टि-कविना। यदधीत्य तु निमज्जति पाठकानां चेत आनन्दोदधौ।

पूर्वोत्तरमीमांसयोर्लेखकाः।

(ले०—कुरुक्षेत्रीयः पं० छज्जूराम शास्त्री विद्यासागरः)।

भगवतो वेदव्यासस्य शिष्येण जैमिनिमुनिना कर्मकाण्डस्य प्रचाराय पूर्वमीमांसादर्शनं प्रणीतम्। यत्र मन्त्रब्राह्मणात्मकेभ्यो वेदेभ्यः कर्माणि संकलितानि अत्र कर्मणैव जगत उत्पत्तिर्मोक्षश्चेति प्रतिपादितं जैमिनिना। तद्यथानुश्रूयते—

"पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन"

"रमणीयचरणा रमणीयां योनिमापद्येरन् कपूयचरणाः कपूयामिति।

"कर्मणा जायते नश्यति भयाभयसुखानीत्यादि श्रुतिषु।

कर्मकाण्डस्यैव प्रचाराय रामायणभारतभागवतादीनि प्रवृत्तानि अस्य दर्शनस्य शाबरभाष्यं श्रीहर्षकृतस्य लिंगानुशासनकोषस्य व्याख्याता भट्टदीप्तस्वामिसूनुः श्रीशबरस्वामी विक्रमीयाष्टमशतके रचितवान्। शंकराचार्येण स्वीयभाष्ये शबरस्वामिनो नाम गृहीतमिति स्मर्तव्यम्। अयं हि शबरस्वामी वेदार्थस्याद्वितीयो ज्ञाता मन्यते। तद्यथानुश्रूयते—"सहस्रं शाखा ह्यर्थतो वेद शबरः" इति। तदनन्तरं कर्मकाण्डस्यैव प्रचाराय जयमंगलग्रामवासी तैलंगभट्टयज्ञेश्वरपुत्रः चन्द्रगुणागर्भजः श्रीकुमारिलभट्टो विक्रमीयाष्टमशतकप्रारम्भे श्लोकवार्तिकं तन्त्रवार्तिकं च ग्रन्थं निर्मितवान्। अनेन जैनद्वारा लुप्तस्य वैदिक धर्मस्य पुनः प्राणप्रतिष्ठा कृता यदुच्यते—

"कुमारिलमृगेन्द्रेण हतेषु जिनहस्तिषु।
निष्प्रत्यूहमवर्धन्त श्रुतिशाखाः समन्ततः॥ इति॥

प्रभाकर-मण्डनमिश्र-मुरारिमिश्र-पार्थसारथि प्रभृतयोऽस्यैव महात्मनो भट्टपादस्य शिष्या आसन्निति श्रृणुमः । अनेन विक्रमीय-षष्ठशतक-वर्ति-कालिदास-महाकवेः—"सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः" इति पद्यार्धं स्वग्रन्थे उद्धृतं तस्माद्ये महात्मानः कालिदासं भोजसमकालीनं मन्यन्ते ते भ्रान्ताः। प्रभाकरमतस्य सारमुद्धृत्य शालिकनाथभिक्षुणा 'प्रकरणपञ्चिका' विहिता। एवं मीमांसकशिरोमणिना मण्डनमिश्रेण 'विधिविवेकग्रन्थः' । पार्थसारथिना च "शास्त्रदीपिका" ग्रन्थो निर्ममे । ततो विक्रमीय-वस्वंकवसुवत्सरे वर्तमानेन सर्वतन्त्रज्ञवाचस्पतिमिश्रेण 'तत्वबिन्दुः' विक्रमीयचतुर्दशशतकमध्यवर्तिना माधवाचार्येण "जैमिनीयन्यायमाला' गागाभट्टेन विक्रमीयषोडशशतकमध्यभागे—"भाट्टचिन्तामणिः" आपदेवेन विक्रमीयसप्तदशशतकपूर्वभागे—"मीमांसान्यायप्रकाशः" लौगाक्षिभास्करेण विक्रमीयसप्तदशशतकमध्यभागे—"मीमांसार्थसंग्रहः" खण्डदेवेन विक्रमीयसप्तदशशतकोत्तरभागे—"भाट्टदीपिका" भट्टशंकरेण-"मीमांसासारसंग्रहः" निर्ममे । पूर्वमीमांसाऽनीश्वरवादिनी मन्यते । अत एव श्लोकवार्तिकादौ प्रतिपदं जगत्कर्तुरीश्वरस्य खण्डनमुपलभ्यते । परन्त्वसावीश्वरानंगीकारः पूर्वमीमांसकैः प्रौढिवादमुद्रयाऽवतारितो न खलु विवक्षितोऽस्ति । कथमन्यथा सर्वे मीमांसाग्रन्थकाराः-स्वस्वग्रन्थेषु ईश्वरविषयकं मंगलमाचरितवन्तो यदीश्वरवादिनस्ते न स्युः ।

"विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥

इतिश्लोकवार्तिके भट्टकुमारिलः ।

"वासुदेवं रमाकान्तं न त्वालौगाक्षिभास्करः" ।

इत्यर्थसंग्रहे लौगाक्षिभास्करः ।

"यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयम् ।
प्राप्यते तमहं वन्दे गोविन्दं भक्तवत्सलम् ॥

इति न्यायप्रकाशे आपदेवः ।

'भावं जैमिनिर्विकल्पामननादित्यादि ब्रह्मसूत्रेषु जैमिनि-मतस्मरणात्प्रथमं जैमिनिना पूर्वमीमांसा रचिता तदुत्तरं भगवता वेदव्यासेनोत्तरमीमांसा (वेदान्तदर्शनं) इति सर्वानुमतः पन्थाः । वेदेभ्यो ब्रह्मण उपासनाज्ञाने उपादाय जीवब्रह्मैकत्वप्रतिपादनार्थमयं प्रयासः । सर्वेषां दर्शनानां मूलसूत्रमुपनिषत्सूपलभ्यते यत्र तत्र । पूर्वोत्तरमीमांसयोः समानतन्त्रत्वं मन्यते सर्वैरपि । तद्यथा विज्ञानभिक्षुराह" जैमिनीये च वैयासे विरुद्धांशो न कश्चन ।

श्रुत्या वेदार्थविज्ञाने श्रुतिपारंगतौ हि तौ" ।

अत एवैतयोरुपरि नन्दराज्योत्पन्नेनोपवर्षपण्डितेन—

काचित्समुदिता वृत्तिर्निरमीयतेति शृणुमः । उत्तरमीमांसायाः वेदान्तदर्शनस्योपरि सर्व प्रथमं शङ्करावतारेण श्रीशङ्कराचार्येण शारीरक भाष्यं निर्मितं यत्र—

'ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापर' इति सम्यक्साधितम् । केनचित्शंकराचार्यशिष्येण शारीरकभाष्यसारबोधिनी अद्वैतमञ्जरीनाम्नी वेदान्तसूत्रवृत्तिरपि तस्मिन् समये अतिहृदयंगमा लिखिता । ततो रामानुजभाष्यं, माध्वभाष्यं, निम्बार्क भाष्यं, अणुभाष्यमिति वैष्णवसाम्प्रदायिकं भाष्यचतुष्टयं जातम् । नीलकंठस्य शैवभाष्यं च षष्ठम् । एतेषां षण्णां भाष्यकाराणां मतस्य सारं मया बहुविस्तरेण 'षड्दर्शनपरिचये' ग्रन्थे लिखितस्तत्त्रैव कर्णेहत्य निरीक्षणीयम् । शारीरकभाष्यस्य चतस्रो व्याख्या अतितरां प्रसिद्धाः सन्ति । तत्र शंकराचार्यस्यैव शिष्यस्य पद्मपादाचार्यस्य 'पंचपादिका' प्रथमा । तोटकाचार्यापरनाम्न आनन्दगिरे "न्यायनिर्णयाख्या" द्वितीया । सर्वतन्त्रज्ञवाचस्पतिमिश्रस्य "भामत्याख्या" तृतीया विक्रमीयषोड़शशतक-मध्यवर्तिनो गोविन्दानन्दस्य- 'रत्नप्रभाख्या' चतुर्थी । शारीरकभाष्यमुपजीव्य मण्डनमिश्रशिष्येण सर्वज्ञात्ममुनिना हृद्यैः पद्यैः "संक्षेपशारीरक" नामा ग्रन्थो व्यरचि । यस्योपरि मधुसूदनस्वामिव्याख्या जागर्ति । तदनन्तरम् कवितार्किक-श्रीहर्षमिश्रेण प्रतिवादिविजयार्थं "खाद्यखण्डनं" निरमायि । यद्विषये तेनोक्तम्—

धीरा यथोक्तमपि कीरवदेतदुक्त्वा ।
लोकेषु दिग्विजय कौतुकमातनुध्वम्' ।

यस्य समयो विक्रमीयैकादशशतकम् भागवतटीका-श्रीधरीकर्तुः श्रीधरस्वामिनो गुरुणा चित्सुखाचार्येण विक्रमीय-त्रयोदशशतके 'चित्सुखी' ग्रन्थो रचितो यत्र न्यायमतखण्डनादिकं खाद्यखण्डनमुपजीव्यैव कृतम् । ततो विद्यारण्यापरनाम्ना माधवाचार्येण "पंचदशी" ग्रन्थो विहितो यस्य समयो विक्रमीय चतुर्दशशतकम् । तदनु मधुसूदनस्वामिना विक्रमीय षोडशशतके 'अद्वैतसिद्धि' ग्रन्थो रचितः । यद्विषये तेनोक्तम्—

"श्रद्धाधनेन मुनिना मधुसूदनेन संगृह्य शास्त्रनिचयं रचितातियत्नात् बोधाय वादिविजयाय च सत्वराणामद्वैतसिद्धिरियमस्तुमुदे बुधानाम् ।

एवं सदानन्द व्यासेन विक्रमीयषोडशशतकपूर्वार्धभागे "वेदान्तसारः" संगृहीतः । प्रकाशानन्दस्वामिना विक्रमीयषोडशशतकमध्यभागे-'वेदान्तमुक्तावली' रचिता । धर्मराजाध्वरीन्द्रेण विक्रमीयषोडशशतकस्योत्तरभागे-'वेदान्तपरिभाषा'

विहिता । उत्तरमीमांसायां ज्ञानकाण्डस्य प्राधान्यं रक्षितम् । तद्यथानुश्रूयते 'ज्ञानादेवतु कैवल्यम्' 'ऋतेज्ञानान्न मुक्ति' रित्यादि । वयन्तु ब्रूमः–
"उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः ।
तथैव ज्ञान-कर्मभ्यां प्राप्यते परमं पदम् । अत एव द्वयोरपिमीनांसयोरधिकारिभेदात्तत्सार्थक्यमिति शम् ।

❋ श्रीराम सुहृद् निषादराजः ❋

[ले०-श्रीरामोपनामा लक्ष्मीनारायण द्विवेदी साहित्यशास्त्री]

इदं किल नाविदितमस्ति प्रेक्षावतां यच्छ्रीरामसखं निषादाधिपतिं गुहं चण्डालं मृगघातिनं च मन्यन्ते सचक्षुषोऽपि साम्प्रतम् । तत् किमयं वस्तुतश्चण्डालो मृगघात्येव वाऽऽसीत् ? श्रीधारामोपाध्यायेनापि स्वनिर्मितायां वाल्मीकीय रामायणस्यादिसर्गस्य टीकायां चण्डालत्वेन लिखितोऽयम् । अथान्येनाप्याचार्येण "निषादो मृगघाती स्याद्" इति वैजयन्ती प्रमाणेन मृगघातित्वेनोक्तः ।

अत्रेदं वक्तव्यम्—द्वेधा वर्ण-संकरजातयः स्मृतिषूक्ताः । आनुलोम्यात् प्रातिलोम्याच्च । तत्र वर्णानुलोम्येन जात्यानुलोम्येन संकीर्णानुलोम्येन चोत्कृष्ट जातीयपुरुषादपकृष्टजातीय-नारीषु जाता अनुलोमजाः, तद्विरोधेन च प्रतिलोमजाः । तत्र ये वर्णानुलोम्येन जातास्तेषामेकतमो निषादः । अयं पारशवापर पर्याय उच्यते । तथाहि मनुः—

अनन्तरासु जातानां विधिरेष सनातनः ।
द्व्येकान्तरासु जातानां धार्यं विद्यादिमं विधिम् ॥ १० ।७ ॥
ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते ।
निषादः शूद्र कन्यायां यः पारशव उच्यते ॥ १० ।८ ॥

ततोऽयं ब्राह्मणपुरुषेणोढायां शूद्रकन्यायां जातो निषादः । ऊढत्वं च याज्ञवल्क्येन स्पष्टीकृतम्, तथाहि:—

विप्रान्मूर्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम् ।
अम्बष्ठः शूद्रयां निषादो जातः पारशवोऽपि वा ॥
वैश्या शूद्रयोस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ ।
वैश्यात्तु करणः शूद्रयां विन्नास्वेष विधिः स्मृतः ॥ इति
अध्यायः ४ श्लो० ९१, ९२.

विन्नासूढासु—इति श्री विज्ञानेश्वरः । वशिष्ठ एवं शूद्रवर्णमाहाप्टादशेऽध्यायेः—

एकान्तर द्व्यन्तर त्र्यन्तरानुजाता ब्राह्मण क्षत्रिय वैश्यै रवच्छिन्ना अम्बष्ठा निषादा भवन्ति । शूद्रायां पारशवः पारयन्नेव जीवन्नेव शवो भवतीत्याहुः, शव इति मृताख्या "एतच्छावं यच्छूद्रस्तस्माच्छूद्र समीपे तु नाध्येतव्यम्" इति ।

एतस्याजीविकामाह मनुः "मत्स्य घातो निषादानाम्" इति दशमेऽध्यायेऽष्ट चत्वारिंशे श्लोके ।

अथायं निषादो नाम कैवर्तानां नौकर्मजीविजाति-विशेषाणां जनकः । तथाह मनुरत्रैव चतुस्त्रिंशेः—

निषादो मार्गवं सूते दासं नौकर्म जीविनम्
कैवर्तमिति यं प्राहुरार्यावर्त-निवासिनः ॥ इति ॥

सोऽयं दासः कैवर्तापर पर्याय एव धीवरत्वेन लोके स्मर्यते । यः सर्वेषां वर्णानां गृहेषु जलभरणकर्म सम्पादयति । पात्र संमार्जनादि सेवाकर्म करोति । सर्वथा पात्रे समितश्चेति तदुत्पादकस्य निषादस्य चण्डालत्वेन पात्रे निरवसितत्वात् श्रीरामस्य भगवतो मर्यादा पालकस्य कथं सखित्वं स्यात् ।

नन्वस्ति चण्डाल जातिर्निषादः ? 'निषाद श्वपचौ, इत्यमरोक्तेः, 'निषादोश्वपच स्वरौ-' इति त्रिकाण्ड शेषवचनात्, इति चेत् सत्यम्, इतर एवैष श्वपचाख्यो निषादः । यश्च पारशवाख्यो निषादः सोऽप्यन्यः । तदुक्तं मेदिनीकारेण- "निषादः स्वर "भेदे स्याच्चण्डाले धीवरान्तरे, इति ।

आस्तां तावच्चण्डालोऽपि राम सख इति माऽऽग्रहः कारि । रामायणस्थ प्रकरण विरोधात् । निषादराजस्य गुहस्य निघ्नत्वे शतशो नौकर्मजीविन आसन् ते च सर्वेऽस्य सजातीया आसन्

श्रीमद्रामायणेऽमी पर्यायत्वेन 'दाश' इत्युच्च । इत्यनुपदर्शयिष्यते दाशः, कैवर्तः, धीवर इति नामान्तराणि धीवर जातेः । तथाहि अयोध्या काण्डे एकोन नवति तमे सर्गेः—

गुहस्य तत्तु वचनं श्रुत्वा स्नेहादुदीरितम् ।
रामस्यानुवशो वाक्यं भरतोऽपीदमब्रवीत् ॥
सुखा नः शर्वरी धीमन् पूजिताश्चापि ते वयम् ।
गंगां तु नौभिर्बह्वीभीर्दाशाः सन्तारयन्तु नः ॥
ततो गुहः सन्त्वरितः श्रुत्वा भरत शासनम् ।
प्रति प्रविश्य नगरं तं ज्ञातिजनमब्रवीत् ॥

(५४ पृष्ठावशिष्टः)

उत्तिष्ठत प्रबुध्यध्वं भद्रमस्तु हि वः सदा ।
नावः समुपकर्षध्वं तारयिष्यामि वाहिनीम् ॥
ते तथोक्ताः समुत्थाय त्वरिता राजशासनात् ।
पंच नावां शतान्येव समानिन्युः समन्ततः ॥ इति ॥

अथ निषाद-जातिपुरुषैरन्य-जातीयासु स्त्रीषु निषादीषु चेतर-जातीय-पुरुषैर्जातानि जात्यन्तराणि अनुक्रमत ऋषिभिरुक्तानि तथा व्युत्क्रमतोऽपि । तान्यप्रसंगतया नोच्यन्ते ।

यस्तु चण्डालो निषादः स प्रतिलोमज संतानतया सर्वथा पात्रे निरवसितो गर्हितः । एष हि शूद्रवीर्याद्ब्राह्मणीषु जायते । तथोक्तं तत्रैव मनुना—

शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणाम् ।
वैश्य-राजन्य-विप्रासु जायन्ते वर्ण-संकराः ॥

शूद्र-पुरुषात् क्रमशो वैश्या-क्षत्रिया-ब्राह्मणीषु आयोगवः क्षत्ता नृणामधम-श्चण्डालश्च जायत इत्यर्थः । अयं पुनरत्यन्त-धर्मकार्य-बाह्यत्वाद्बाह्य इत्युक्तं, 'यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते' –इति वदता भगवता मनुना ।

तस्मादयं निषादराजो गुहो दास आसीदिति निर्विवादमेतत् । सख्यं त्वेतादृशैर्गुह्यतयाऽपि जायते इति लोक-सिद्धम् धर्मतश्चाविरुद्धम् । इति शिवम् ।

परीक्षासूचना ।

कार्याध्यक्ष-परीक्षा विभाग महामण्डल भवन, बनारस ।

बी० डी० सी० परीक्षा जो धार्मिक परीक्षा है और बी० ए० परीक्षाके तुल्य सम्माननीय है । उसकी आगामी परीक्षाका विषय शिष्ट समितिकी बैठकके बाद स्थानीय 'आज' और 'सूर्य्य' तथा बङ्गाल के वसुमति, अमृतबाजार पत्रिका और बङ्गवासी एवं मद्रास के 'हिन्दू' और बम्बई के 'इण्डियन मिरर' वेङ्कटेश्वर समाचार, और गुजराती तथा पूनेके 'केशरी' पत्र में यथा समय प्रकाशित किया जायगा ।

त्वर्यताम् त्वर्यताम् संस्कृतच्छात्रैः ।

सन्त्येव यद्यपि दीपि० न्या० बो० त० सं० वैदुष्यपूर्णाः प्रत्ना नूत्नाश्चानेकाष्टीकाः । तथापि तासामतिदुरूहत्वान्मूलार्थालापनेऽसामर्थ्यात्क्लीणत्वाच्च छात्राणामतार्किकाणामध्यापकानां चाध्ययनाध्यापनेऽसन्दिग्धं त० सं० न्या० बो०, दीपि, तत्वप्रकाशनेऽलं प्रसादगुणं चातिसंक्षेपविस्तरविवर्जितं क्रमेण सं०, वि० स्थ०, स्ने० व० नामभिष्टीकात्रयं तत्तन्मूलानामधस्तात्संयोज्य ग्रन्थोऽयं प्रकाशितोऽस्माभिः । तत्तद्विषयादौ सौगम्याय 'शक्तेरतिरिक्तपदार्थत्वखं०, व्यधिकरणधर्मावच्छिन्नाभावखं०, जातिरेवपदशक्यमितिमीमांसकमतखण्डनम्' इत्यादयः शिरोलेखा स्तथा दुरूहेषु शतशो विषयेषु तादृशाः स्वतन्त्राः निबन्धा अपि योजिता यथा तत्पाठेनैव ग्रन्थहार्दमवगच्छन्तच्छात्रास्तन्मात्रलेखनत एव सूत्तरेयुः परीक्षा सरितम् । अलं श्लाघया प्रतिपाठशालमेकैकमपि पुस्तकमानाय्यावश्यमस्यानन्यसाधारणत्वमवधारयन्तु भवन्त इत्यर्थये । मू० ॥।)

अस्माभिः सि० कौ० परीक्षोपयोगि पठनपाठन सौकर्यायाद्य खण्डद्वयोपरि अपि काश्यादिस्थानस्थविद्वज्जन-परिपाट्यैव पं० प्र० नाम्नाऽपूर्वो निबन्धः प्रकाशितः । एतं विनापि छात्रा वञ्चिता एवेत्यत्र नास्त्यतिशयोक्तेर्लेशोऽपि । क्रमेण मू० ॥)–।=)

दीपमालिकां यावत् यथेच्छं युगपत्पञ्चाधिकपुस्तकग्राहकैर्मार्गव्ययोऽपि न देयः ।

(प्राप्तिस्थानम्) श्रीमान् पण्डितरामचन्द्र शास्त्री 'श्री दादुमहाविद्यालय,
जयपुर सिटी ।

ग्राहकैरवश्यमवधेयम्

किमत्र वक्तव्यं ? बहुशो बोधिता विज्ञापिता अपि केचन पत्रव्यवहारकर्तारो ग्राहकाश्च स्वपूर्णसंकेतादि सहितं पत्रव्यवहारं नाचरन्तीति तैर्नूनमत्रध्यानं देयम् ।

Printed by Pt. Janki Sharan Tripathi at the Surya Press, Benares City
Published by Pt. A.P. Sharma, Bharatdharmamahamandal, Benares.